श्रीमत् पदवाक्यप्रमाणपारावारपारीणधुरीण सर्वतन्त्रस्वतन्त्र

श्रीमद्गम्भीररायदीक्षितसूरिसूनुना भासुरानन्दनाथेति-

दीक्षानामशालिना श्रीविद्योपासककुलचूडामणिना

श्रीमत् भास्कररायेण प्रणीत


श्री ललितामहात्रिपुरसुन्दरी महायागक्रमः

भावनोपनिषत् प्रयोगाविध्यपरनामकः

आस्थानविदुषा के. पी. नारायणमनीषिणा

श्री राममुद्राशालायां मुद्राप्य प्रकटीकृतः ।

सम्यक् शतं क्रतून् कृत्वा यत्फलं समवाप्नुयात् ।
तत्फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनम् ॥
षोडशं वा महादानं कृत्वा यत्फलमाप्नुयात् ।
तत्फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनम् ॥



बिन्दुत्रिकोणवसुकोणदशारयुग्म
मन्वश्रनागदळसंयुतषोडशारम् ।
वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रमेतदुदितं परदेवतायाः ॥

श्रीः

श्री महात्रिपुरसुन्दर्यै स्वात्मने नमः ॥

पितृभ्यामप्यभ्यर्हिततमया श्रुतिजनन्या श्रेयः प्रेयसी अधिगन्तुं
थाधिकारं बह्व्यस्सरणयः प्रादर्शिषत ॥ तासु बरीयसीं मानसीमुपास्ति
धिचक्रराजं विवृणोति भगवती भावनोपनिषत् ॥ अथर्वशाखान्तर्ग
यमतिनिगूढार्था परदेवता परमानुग्रहभाजनैः श्री भास्कररायमखिभिः
विस्तरमभाषि ॥ परिकर्मिता च प्रयोगविधिना स्वोपज्ञेन ॥ कादिमत
ौलमतभेदेन द्विप्रकारा भावनाः तन्त्रेषूपलभ्यन्ते ॥ कादिमतेनान्तश्चक्र
ावनाः प्रतिपादिता इति भावनोपनिषदनुसारेणास्यां कादिमतीयतन्त्र-
ूत्राद्युपबृंहणानुगुणं भाष्यमकलि । तन्त्रराजे पञ्चत्रिंशपटले आदितः
योविंशत्या श्लोकैः अन्तश्चक्रभावनाः निरूपिताः । नित्याहृदयेप्यष्टमेवि-
ामे काश्चन भावना उट्टंकिताः । बिन्दुसूत्रेपि काश्चन स्फुटीकृताः । सर्वशा
ाप्रत्ययतामुपासनाया अवलम्ब्य भावनोपनिषद्यनुक्ताविशेषाः तन्त्रान्तरा-
ृभ्य उपसंजह्रिरे भाष्यकृता ॥ सर्वांगोपसंहारेण च प्रयोगो व्यवियत ॥
ावनोपनिषत् प्रतिपादितो यागो रहस्यतरः महायागः ॥ यन्क्रमाराध्यता

ललितासहस्रनाम सुउन्मुद्रिता ॥ उपनिषदोस्याः श्रीभास्कररायीयभाष्या-
पि प्राक् काश्चन व्याख्या आसन्निति तिनिधिकारप्रभृतयः प्रयोगपद्धतिमदी-
शन्निति च श्रीभास्कररायीयभाष्यादवसीयते ॥ तथाच तन्त्रराजनित्या-
दयबिन्दुसूत्रादि प्रमाणप्रदर्शनपूर्वं कंन्यायतः शाखान्तरीयाण्यंगान्युपसं-

इत्य प्रदर्शितोस्य प्रयोगक्रमः प्रामाणिकहृदयंगम इति मन्महे ॥ श्रीभास्कररायीयप्रयोगविधिमातृकासु दृश्यन्ते भिन्नाः पाठाः तेषु स्वस्वदेशिकसम्प्रदायप्राप्त एव श्रेयस्कर इति तु न विवादगोचरः । अस्मदुपलब्धक्रमः कुहचित् पाठान्तरप्रदर्शनेन मुद्रणपदवीं प्रापितः ॥ यद्यप्ययं प्रयोगक्रमः तान्त्रिकप्रबन्धप्रकाशनचणेन श्रीमता अवलान् महाशयेन कालिघट्टनगरे मुद्रितपूर्वः । तथापि तत्रास्मदीयप्रयोगवैलक्षण्यं पश्यद्भिर्मुद्रणमस्यारभ्यत ॥

अत्रापि सीसकाक्षरयोजनवैकल्येन काश्चनाशुद्धयो मुद्रणपथमधिरूढाः ॥ ताः शुद्धिपत्रे सम्यगकार्ष्म एवमस्मदीयबुद्धिदोषात् दृष्टिदोषाद्वा या अशुद्धयो दृष्टिगोचरा उपासकानां भवेयुः तास्समीकृत्य विनिवेदयन्त्वस्माकं येन वयमपि कृतार्था भवेम । अस्मन्मित्रवर्यैः श्रीसुन्दरीसमाराधनतत्परैः स्वयं प्रतिदिनं भावनोपनिषदुदिता भावनाभावयद्भिः कल्याणनगरस्थ श्री चामराजेन्द्र संस्कृत महापाठशालाऽद्वैतवेदान्त प्रधानाध्यापकपदालंकृतैः श्री नारायणशास्त्रिभिः कृतमुद्रणोयं श्री सुन्दर्युपासकानां उपकारायबोभवीतु ॥ विशिष्य श्री नारायणशास्त्रिणां पराम्बाप्रसादमादधात्विति सच्चिदानन्दात्माभिन्नां श्री ललितांबां साञ्जलिबन्धमर्थये ॥ इति उपासकचरणसरसीरुहभृंगः

श्री शंकरमठीय भारतगीर्वाणप्रौढकलासंवर्धनी

कल्याणनगर
21-4-55

कलाशालाध्यक्षः पण्डितराज
श्री रामचन्द्र शास्त्रि महोदयः

श्री मात्रे नमः

‘अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम्’

‘कुपुत्रो जायेत क्वचिदपि कुमाता न भवति’

‘मातेव पुत्रान् रक्षस्व’

‘मातेवरक्षति पितेवहिते नियुँक्ते’

‘मातृप्रियं किल जडं सुतमामनन्ति’

‘न मातुः परमस्ति दैवतम्’ इत्यादि प्रमाणवचोभिः मातुरवश्य-पूज्यतायां स्थितायां जगन्मातुः परदेवतायाः निखिलजगत्सृष्टिस्थिति प्रतिहतिषु निर्व्यपेक्षायाः सकलजगज्जाल परिपालनबद्धकङ्कणायाः कैमुतिकन्यायसिद्धं परिपूज्यत्वमिनि तदुपास्तिकरणे मार्गत्रयस्य कायिक वाचिक मानसिकरूपस्य बहिर्याग जपान्तर्यागरूपस्य त्रिपुरातापिन्यादौ विवृततया मानसीं परमश्रेयोनिदानभूतां भावनानाम्नीमुपास्तिं भगवानाम्नायः भावनोपनिषद्रूपेण प्रकाशयति ॥ तस्याः प्रयोगविधिं महायागक्रमशब्दितं तत्र भवान् भास्करराय: तन्त्रराजाद्युपबृंहण-प्रमाणमनुसृत्य व्यरीरचत् ॥

निष्कामो देवतां नित्यं योर्चयेत् भक्तिनिर्भरः
तामेव चिन्तयन्नास्ते यथाशक्तिमनुं जपन्
सैव तस्यैहिकं भारं वहेन्मुक्तिं च साधयेत्
सदा सन्निहिता तस्य सर्वं च कथयेत सा
वात्सल्यसहिता धेनुर्यथावत्समनुव्रजेत्
तथानुगच्छेत्सादेवी स्वं भक्तं शरणागतम् ॥ इत्यादि प्रमाणवचनैः

भक्तजनस्य ऐहिकामुष्मिक सकल वञ्छितार्थपरिपूरणचणायाः कारुण्य-वारांनिधेः परदेवतायाः सकलभक्तजनसंरक्षणधुरंधरायाः त्रिकरण्या त्रिविधामपि वरिवस्यां संपादयितुम् अभिलषतां साधकसहृदयानामत्य-न्तोपकारकमिदं पुस्तकम् प्रकाशयितुं चिराय प्रयतमानानां अस्माकं सांप्रतं मनोरथाः फलेग्रहयसंपन्नाः इति करुणारससागरायाः तस्याः पादारविन्दयोः परस्सहस्रप्रणामपरंपरास्समर्पयामः ॥

एवं भगवत्या भावनोपनिषज्जनन्या प्रतिपाद्यमानं महायाग क्रमं प्रकाश्य श्री विद्योपासक कुलैरनुष्ठीयमानायाः चतुष्षष्ट्युपचार पूजाया अपि संग्रहं स्वोपज्ञपद्यावळीरूपेण प्रकाशितं वीरेन्द्राणां मुदे प्राचीकशम् ॥

ततः त्रैपुरस्य षोडशर्चस्य सूक्तस्य परदेवतास्तुतौ विनियुक्तस्य पारायणमात्रेणापि बहुफलप्रदस्य सर्वतन्त्रस्वतन्त्र भास्कररायविरचित भाष्यसंवळितस्य प्रकाशनं सकलोपासकजनता प्रीतये बोभवीतु ॥

"सम्यक् शतं क्रतून् कृत्वा यत्फलं समवाप्नुयात्
तत्फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनम्"
षोडशं वा महादानं कृत्वा यत्फलमाप्नुयात्
तत्फलं समवाप्नोति भक्त्या श्रीचक्रदर्शनात् ॥ इत्यादि

प्रमाणैः यदीय दर्शनमात्रेण महाफलसंपत्तिः प्रतिपादिता ॥

गङ्गापुष्कर नर्मदासुयमुना गोदावरी गोमती
गङ्गाद्वार गया प्रयाग बदरी वाराणसी सिन्धुषु

रेवासेतुसरस्वती प्रभृतिषु ब्रह्माण्डभाण्डोदरे

तीर्थस्नानसहस्रकोटिफलदं श्रीचक्रपादोदकम् ॥ इत्यादि प्रमाण निकुरुम्बैः यदीय पादोदक सेवनस्य सहस्रकोटितीर्थस्नान फलप्रदता प्रास्तावि । तत्तादृशं श्रीचक्रं अत्र सूक्ते आदिनः सार्धचतुष्टय-ऋङ्मन्त्रेण विशदीकृतम् ॥

अश्वमेधसहस्राणि वाजपेयशतानि च

ललितापूजनस्यैते लक्षांशेनापि नो समाः ।

सदाता समुनिर्यष्टा सतपस्वी सतीर्थगः ॥

यस्सदा पूजयेद्देवीं गन्ध पुष्पानुलेपनैः ।

गन्धानुलेपनं कृत्वा ज्योतिष्टोमफलं लभेत् ॥

चन्दनागरुकर्पूरैः सूक्ष्मपिष्टैस्सकुंकुमैः ।

आलिप्य ललितां लोके कल्पकोटीर्वहेन्नरः ॥ इत्यदि पाद्मवचनैः

येर्चयन्ति परां शक्तिं विधिनाऽविधिनापि वा ।

न ते संसारिणो नूनं मुक्ता एव न संशयः ॥

वर्णाश्रमविहीनानां पापिष्ठानां नृणामपि ।

यद्रूपध्यानमात्रेण दुष्कृतं सुकृतायते ॥ इत्यादि ब्रह्माण्डोक्तिभिः

छित्वा भित्वा च भूतानि हत्वा सर्वमिदं जगत्

प्रणम्य शिरसा देवीं न स पापैर्विलिप्यते

सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ।

दुर्गां दृष्ट्वा नरः पूतः प्रयाति परमं पदम् ॥ इत्यादि श्री देवी भागवत सूक्तिभिः

श्री पराम्बां जगद्योनिं केवलं ये समाश्रिताः । ते मनुष्या न मन्तव्याः स्साक्षाद्देवीगणाद्युत ॥ इति उमासंहितायाम् 'एक पंचाशत्तमाध्याय वचनेन च, यदीय सेवायाः सकलपापापनोदकत्वं चतुर्विध पुरुषार्थ प्रदायकत्वं च विस्पष्टं व्यत्रियत । तस्याः जगन्मातुः बाह्यां वरिवस्यां अस्मिन् सूक्ते 'इमां विज्ञाय सुधया' इत्यादिकया सप्तम्या ऋचा प्रतिपादयति ।

त्रिविधक्षेत्रेषु नामभेदेन यानि देवीरूपाणि पुराणतन्त्रादिषु उपलभ्यन्ते तानि सर्वाणि अस्या एव रूपान्तराणि इति मदन्तिकामानिनी, इत्यादि षष्ठर्चे विशदयति ॥

ललिता शारदा लक्ष्मीः एकैव भगवत्युमा
तत्तल्लक्षणसंयुक्ता पुरुषार्थप्रदा नृणाम् ।
यावन्त्यस्या महाशक्तयः तावद्रूपाणि शंकरः ।
कृतवान् ताश्च भजते पतिरूपेण सर्वदा ॥ इत्यादि वराह पुराणोक्तिभिः ॥

उमैव बहुरूपेण पत्नीत्वेन व्यवस्थिता। इत्यादि नरसिंह पुराण वचनेन च ॥

'भण्डासुरहननार्थं एकैव अनेका' इति गौडपादीय सूत्रेण च
आद्या शक्तिर्महेशस्य चतुर्धा भिन्नविग्रहा
भोगे भवानीरूपा सा दुर्गा रूपा च संगरे
कोपे च कालिकारूपा पुंरूपा च मदात्मिका इति। वीरभद्रं प्रति

विष्णु वचनेन च ।

भोगे भवानी समरे च दुर्गा कोपे च काली पुरुषेषु विष्णुः ।

एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले ॥

इत्याद्यागमवचनैश्च, एकस्या एव कार्यवशतो नानारूपत्वं सुस्पष्टं प्रतीयते ॥

पुंरूपं वा स्मरेद्देवीं स्त्रीरूपं वा विचिन्तयेत् ।

अथवा निष्कलं ध्यायेत् सच्चिदानन्दलक्षणम् ॥

इत्यादि प्रमाणानि च, तत्तदिच्छानुरोधेन पुंरूपतया स्त्रीरूपतया निर्गुण ब्रह्मरूपतया वा परदेवतायाः ध्येयत्वं प्रतिपादयन्ति ॥ तच्च पुंरूपं कीदृग्विधमिति विचिकित्सायाम्

ममैव पौरुषं रूपं गोपिकाजनमोहनम् । इति ब्रह्माण्डोक्त्या ।

कदाचिल्ललिता देवी धृत श्रीकृष्णविग्रहा ।

वेणुनाद विनोदेन मोहयत्यखिलं जगत् ॥ इत्यादि पुराण वचनेन

सहस्रमूर्धानमनन्तशक्तिं सहस्रबाहुं पुरुषं पुराणं

शयानमब्धौ ललित तवैव नारायणाख्यं प्रणतोस्मि रूपम् ॥

इति कूर्म पुराणोक्त हिमालयकृतदेवीस्तवे हिमाचलवचनेन च विष्णु रूपमित्येवावगम्यते । तथाहि सनत्कुमारसंहितायां प्रभाकरनृपतेः विष्णु भक्तिं तत्पत्न्याः पद्मिन्याः देवीभक्तिं च वर्णयित्वा उक्तम्

एवं देव्यात्मना स्वेन रूपेण च जनार्दनः ।
दम्पत्योरेककायत्वात् एक एव द्विधार्चितः । इति ॥

बृहत्पाराशर स्मृतावपि :–

दुर्गां कात्यायनीं चैव यजन् वाग्देवतामपि ।
चेतसा सुप्रसन्नेन विष्णुलोकमवाप्नुयात् ॥ इति पाद्मेपि :–

चण्डिकां स्नापयेद्यस्तु ऐक्षवेण रसेन च ।
सौपर्णेन सयानेन विष्णुना सह मोदते । इति

आदित्यशिवपुराणयोस्तु :—

या तस्य पार्श्वगा बाला सा पार्वत्यंशजो हरिः ॥ इत्युक्तम्

पाद्मे पातालखण्डे च पञ्चसप्ततितमाध्याये गोलोकादागतेन नारदेन शौनकादीन् प्रति बृन्दावनमाहात्म्यकथनमुपक्रम्य ब्रह्मणा बृन्दावन माहात्म्यज्ञानाय नारदेन साकं विष्णुसमीपगमनं चोपवर्ण्य । इदमुच्यते

अहं च वासुदेवाख्यः नित्यं कामकलात्मकः
अहं च ललितादेवी पुंरूपा कृष्णविग्रहा
आवयोरन्तरं नास्ति सत्यं सत्यं हि नारद । इत्युक्त्वा :—
इदं बृन्दावनं नाम रहस्यं मम वैगृहम् । इत्युपसंहृतम् ॥

अनेन च संदर्भेण विशदीकृतं परदेवतायाः पुंरूपं श्रीमान् वासुदेव एवेति ॥

अयमेवार्थः 53 पुटे कौलोपनिषद्भाष्ये विष्णुस्वरूपस्य परशिवावरोध त्रिपुरसुन्दरीप्रकटरूपान्तरात्मकतया इति ग्रन्थेन श्रीमद्भास्कराय महा भागैः प्रकटीकृतः ॥

कामाक्ष्येव महालक्ष्मीः चक्रं श्री चक्रमेव हि ।
श्रीविद्यैव महाविद्या नायको गुरुनायकः ॥

इत्यादि ब्रह्माण्डोक्तरीत्या

कामो योनिः कमला ।
षष्ठं संतममथवह्निसारथिं ॥ इत्यादि

मन्त्र द्वयेन श्री विद्याख्य महामन्त्रस्य कामराजलोपामुद्राभ्या मुपासित प्रस्तारद्वयमाह ॥

तत्र कामराजान्तमन्त्रान्ते श्रीबीजेन समन्विता ।
षोडशाक्षरविद्येयं श्री विद्येति प्रकीर्तिता ॥ इति

भगवता हयग्रीवेण षोडशी स्वरूपं वर्णितम् ॥ गौडपादीय सूत्रे तु

अथाष्टाविंशतिवर्णा विशिष्ट विद्या इति ।
अष्टा विंशति वर्णेयं श्री महा षोडशाक्षरी ॥ इति

वचनानुसारेण महा षोडशीविद्या, अष्टाविंशत्यक्षरा प्रस्तूयते ॥

अष्टौ बीजाक्षराण्यादौ पश्चात्पंचदशी ततः ।
पंचबीजाक्षराण्येषा श्रीमहाषोडशीमता ॥ इति

च प्रमाणान्तरं सूत्रानुसारि समुपलभ्यते ॥

शक्तिरहस्ये षोडशीमहिमानं एवमाह :—

कोटिभिर्वाजपेयानां यथा षोडशकोटिभिः
प्रीयतेम्बा तथैकेन षोडश्युच्चारणेन सा ॥ इति

राजराजेश्वरी तन्त्रेतु :—

षोडशार्णं महामन्त्रम् मन्त्रराजोत्तमोत्तमम् ।
सकृच्छ्रावण मात्रेण कोटिजन्माघनाशनम् ॥
महापातककोटीनां भंजनं स्मृतिमात्रतः ।
उपपातकदौर्भाग्य शमनं भुक्तिमुक्तिदम् ।
विषरोगादि दारिद्र्य मृत्युसंहारकारकम् ।
सप्तकोटि महामन्त्र पारायण फलप्रदम् ।
चतुस्समुद्रपर्यन्त भूदानफलदं शिवे ।
सहस्रकोटिगोदान फलदं ध्यानमात्रतः ।
कोट्यश्वमेधफलदं जरामृत्युनिवारणम् ।
किंपुनर्बहुनोक्तेन शिवसायुज्यदायकम् ॥

इत्यादि फलविशेषः प्रपंचितः ॥

अयमर्थः अस्यां त्रिपुरामहोपनिषदि

नाकस्य पृष्ठे महतो वसन्ति परन्धाम त्रैपुरंचाविशन्ति ॥ इति

मन्त्रभागभाष्ये महानाकपृष्ठवासः त्रिविधपुरुषार्थोपलक्षकः त्रिपुरायां

परं धाम तु मुक्तोपसृप्यं स्वरूपं । तेन मोक्ष उच्यते ॥

सर्वान् कामान् मोक्षश्चाप्नुवन्ति इति भष्येण ।
तुष्टुवांसोमृतत्वं भजन्ते ॥ इति मन्त्रभागभाष्ये
विद्याजपेन मोक्षंभावयेदित्यर्थः । इति ग्रन्थेन

उभा दाताराविह सौभगानां ॥ इति मन्त्रभागस्य व्याख्यायां इह उपासनायां सौभगानां धर्मार्थकामरूपाणां त्रिविधफलानां दातारौ इति वचनेन च स्पष्टीकृतः ॥

अस्यां च उपासनायां वाममार्गो दक्षिणमार्गश्चेति द्वौ मार्गौ दृश्येते । तत्र वाममार्गो नाम ॥

स्वस्ववर्णाश्रमविहितानि यावन्ति कर्माणि श्रौतानि अग्निहोत्रादीनि स्मार्तानि अष्टकादीनि तान्त्रिकानि मन्त्र पुरश्चरणादीनि
तेषुसर्वेषु या याः प्रधान देवता अंगदेवता वा तत्तत्स्थाने
स्वोपास्यामेव देवतां सर्वत्र भावयेत् । तत्तद्देवतावाचकपदोत्तरं विशेष्यत्वेन स्वोपास्य देवता वाचकपदं निक्षिपेत् सर्वमन्त्रेषु॥ इति

ईदृशमार्गे देवर्षिपितॄणां ऋणशोधनाभावजन्यं पातकं प्रसज्यते । दक्षिणमार्गे तु स्वोपास्यदेवतायाः वर्णाश्रमविहितकर्मसु कर्मांगदेवतास्थाने भावनीयत्वनिर्बन्धो नास्ति किन्तु तान्त्रिक कर्मांग देवतात्वेनैव भावनीयता । तथा च इतर कर्मणां अनुपरोधात् न तादृश पातकप्रसक्तिः । तथाच अत्र प्रतिबन्धविरहात् झटिति मोक्षः । वाम मार्गे तु ऋणत्रयशोधनाभावेन प्रतिबन्धात् विलंबितः । न चैवं

अनुष्ठानतोपि कठिने फलविलंबे च सति शिष्टानां कथं तत्र वाम मार्गे प्रवृत्तिरिति वाच्यम् ॥ ऐहिकानामुच्चावचफलानां इहैव जन्मनि भोगलिप्सया मोक्षे बिलंबस्य सोढव्यत्वात् वैषयिकशिष्टानां भुक्तिमुक्ति प्रदत्वेन प्रवृत्तिसंभवात् ऐहिकभोगविरक्तानां शिष्टानान्तु विलंबस्य असोढव्यत्वात् दक्षिणमार्ग एव प्रवृत्तिः ॥ इति ॥ तदिदं कालिकापुराणे सविस्तरं न्यरूपि । इति नात्र प्रतायते ।

प्राप्यते सद्भिरेवैषा नासद्भिस्तु कदाचन ।
यैस्तु तप्तं तपस्तीव्रं तैरेषात्मनि धीयते
यस्य नो पश्चिमं जन्म स्वयं यो वा न शंकरः
न तेन लभ्येत विद्या ललिता परमेश्वरी ॥ इति ब्रह्माण्डोक्त्या
शैववैष्णवदौर्गार्क गाणपत्येन्दुसंभवैः ।
मन्त्रैर्विशुद्धचित्तस्य कुलज्ञानं प्रकाशते । इति कुलार्णववचनेन
देवतान्तरमन्त्रौघ जपश्री फलभूतया ।
जापकस्तव देव्यन्ते विद्यया विन्दतेऽमृतम् ॥

इति भगवत्पाद श्रीसूक्त्या च

अस्याः विद्यायाः अतिदुर्लभत्वम् ॥

पंचत्रिकमहाविद्यां ललिताम्बा प्रसादिकाम् ।
ये जपन्ति महाभागाः तेषां सर्वत्र सिद्धयः । इति ब्रह्माण्डोक्त्या
द्विकलाढ्यां त्रिहृल्लेखां द्विहसस्वरभूषिताम् ।
यो जपत्यम्ब ते विद्यां सोऽक्षरः परमस्वराट् ॥

इति भगवत्पादोक्त्या च ।

अनेकजन्मानुष्ठितसुकृतकोटिपरिपाकसमासदितचित्तप्रसादशालिभिः पुरुषधौरेयैः समुपासिता सेयं सर्वाभीष्टघटनापटीयसी इत्यत्र न कापि संशीतिः । ब्रह्माण्डोत्तरखण्डे चतुस्त्रिंशत्तमाध्याये

सर्वेभ्योपि पदार्थेभ्यः शाब्दं वस्तुमहत्तरं ।
सर्वेभ्योपि हि शब्देभ्यः बेदराशिर्महामुने ॥

सर्वेभ्योपि हि मन्त्रेभ्यः वेदमन्त्रा महत्तराः ।
सर्वेभ्यो वेदमन्त्रेभ्यः विष्णुमन्त्रा महत्तराः ॥

तेभ्योपि दौर्गामन्त्रास्तु महान्तो मुनिपुंगुव ।
तेभ्योपि गाणपत्यास्तु मन्त्राःदिव्या महत्तराः ॥

तेभ्योप्यर्कस्य मन्त्रास्तु तेभ्यश्शैवा महत्तराः ।
तेभ्योपि लक्ष्मीमन्त्रास्तु तेभ्यस्सारस्वता वराः ॥

तेभ्योपि गिरिजामन्त्राः तेभ्यश्चाम्नाय भेदजाः ।
सर्वाम्नायमनुभ्योपि वाराही मनवो बराः ॥

तेभ्यः श्यामा मनुबराः वरिष्ठा इल्वलान्तको ।
तेभ्योपि ललितामन्त्राः दशभेद विभेदिताः ॥

तेषु द्वौ मनुराजौ तु बरिष्ठौ विन्ध्यमर्दन ।
लोपामुद्राकामराजौ इति ख्यातिमुपागतौ ॥

हादिस्तु लोपामुद्रास्यात् कामराजस्तु कादिकः ।
हादिकाद्योर्मन्त्रयोस्तु भेदो वर्णत्रयोद्भवः ॥

तयोस्तु कामराजोयं सिद्धिदो भक्तिशालिनाम् ।

इत्युक्तक्रमेण सकलमन्त्रजातमूर्धन्यस्य लोपामुद्राकामराजाख्य मन्त्रद्वयस्य उद्धारः प्रकृतोपनिषदि क्रियते ॥

मनुं चन्द्रं कुबेरं च लोपामुद्रां च मन्मथम् ।

अगस्त्यं नन्दिकेशं च सूर्यं विष्णुं च षण्मुखम् ॥

शिवं दुर्वाससं चैव क्रमेणान्ते समर्चयत् ॥ इति नित्य पूजान्ते पूजनीयानां मन्वादीनां द्वादशविधानामुपासकानां मध्ये "कादि विद्येति वा हादि विद्येति वा सादि विद्येति वा रहस्यम्" इति बहृचवेदीय सुन्दर्युपनिषदुक्तक्रमेण चन्द्रनन्द्यादयः सादि विद्योपासकाः । लोपामुद्रादयः हादिविद्योपासकाः ।

मनुः मन्मथः दुर्वासाश्चेत्येते कादि विद्योपासकाः। ज्ञानार्णव तन्त्रे च; मनु विद्यादि द्वादशविधविद्योद्धारानन्तरम्:

विद्याद्वयमिदं भद्रे देवानामपि दुर्लभम् ।

इत्यादिना उपबृंहितत्वात् लोपामुद्राकामराजयोः केवलयोः अत्र उद्धारः, तयोः सर्वापेक्षया प्राशस्त्यं, एतद्भाष्यादवगन्तव्यम् ॥ दशम्यां ऋचि स्थूलोपस्ति विधातु त्रिविष्टपं त्रिमुखमित्यादिना स्थान निर्देशः कृतः । एकादश्यां द्वामण्डला द्वास्तनात्रिम्बमित्यादिना काम्यं कामकलाध्यानमुपदिष्टम् । द्वादश्यां बहिर्यागद्रव्याणि तत्प्रतिपत्तिं च उपदिशति । त्रयोदश्यां देवतायाः सगुणं ध्यानमाह । भगश्शक्ति

रित्यादिना । चतुर्दश्याम् सगुणस्य कल्पितत्वात् स्त्री पुमभेदमुपदिशति एवं सगुणध्यानमुक्त्वा निर्गुणे वक्तव्यांशस्याभावात् तज्जन्य फलं तन्नामं च

परिसृता हविषा पावितेन ।

इत्यादिना पंचदश्यामाह ॥ इत्थं त्रैपुर सिद्धान्तमुपसंहृत्य एतदध्ययनादपि फलमस्तीति उपदिशति षोडश्याम् ॥

एवं अनया उपनिषदा सकलवेदशास्त्रविद्यादि जपफल दायिन्या परमपुरुषार्थ सिद्धेः निष्प्रत्यूहतया अतिदुर्लभतर भास्करराय महाशयकृतभाष्य संवलिता सेयमुपनिषत् साधकसहृदयानां पुरस्तादुपस्थाप्यते । एवं बह्वृचवेदीयं अथर्ववेदीयं च उपनिषत्द्वयं पारायणमात्रेण महाफलप्रदं । भास्कररायभाष्यसहिता कौलोपनिषच्च इत्येते ग्रन्थाः दुर्लभतराः पारायणादि द्वारा परमपुरुषार्थ सिध्युपयोगिन इति संकल्प्य सम्मुद्रय प्रकाशिताः । एतेषां मुद्रणे पुस्तकसंपादनार्थं चिराय प्रयतमानानामस्माकं पुस्तकदानेन मुद्रितपुस्तकशोधनेन पाठविशेषसौष्ठवप्रकाशनेन च अत्यन्तं साहाय्यमाचरितवतां महामहोपाध्याय बिरुदाङ्कित सुब्रह्मण्यशास्त्रिमहोदयतनयानांपण्डित-राजादि बिरुदावली भूषित शंकरमठीय भारतगीर्वाण प्रौढविद्या-कलाशालाध्यक्ष महाशयानां श्री श्रृङ्गगिरी संस्थानआस्थान महाविदुषां अस्मत् प्रियवयस्यानां रामचन्द्रशास्त्रि महाभागानां अनन्तान् धन्यवादान् समर्पयामः । बहिर्याग अन्तर्याग महायागाख्य

क्रमत्रयं वशिन्यादिगीर्देवतामुखात्प्रकटीकृतं सहस्रनामसूपलभ्यते ॥ तत्रोत्तरोत्तरक्रमस्य प्राशस्त्यं च स्थूलसूक्ष्मसूक्ष्मतरात्मकतया फलतोऽपि गरीयस्त्वान्निर्विवादं ॥

भावनोपनिषत्प्रकाशित महायागक्रमस्सर्वतो गरीयान् । येन जैगीषव्यवामदेवादयो योगिशिखामणयो व्यवह्रियन्ते तत्तादृशं महायागं समनुष्ठाय भक्तजनताचिन्तितकार्यायत्तसिद्ध्या जगति परमानन्दनिर्वृतिभाक् जेजीयतामिति स्वात्माभिन्नां परदेवतां त्रिकालं त्रिकरण्या समभ्यर्थये ॥

इत्थम् परदेवतापादारविन्दपरिचर्यालालसमानसानां सहृदय-साधकवरेण्यानां अत्यन्तोपकारकं इदं पुस्तकम् परिगृह्य साधकजनता श्रीमातुः परमानुग्रहभाजनम् भूयादिति साञ्जलिबन्धं सप्रणामं सामोदं सप्रणयं सादरं च आशासानः भक्तजनपादकमल रेणुर्नारायणः ॥

		शुद्ध	अशुद्ध
पुट	3	अस्थ्यधि	अस्थ्याधि
	,,	अम्लरसा	आल्म
	,,	टि॰ महात्रिपुर	त्रिपुर
	6	रूपाधः	रूपध
	,,	मूलाधारात्म	धारत्म
	,,	रूपानाहता	रूपनाहता
	,,	महाङ्कुशा	महाशङ्कुशा
	,,	यैंत्रिपुरायैनमः	यैंनमः
	7	वाय्वाकाश	वाव्या
	,,	याणिपाद	पादपाणि
	,,	त्मने	त्मनने
	,,	वाय्वा	वाथ्वा
	8	गुल्फ	गुल्प
	,,	शंखरू	शखरू
	10	जृम्भको	जुम्भको
	,,	निर्ऋति	निऋति
	,,	प्लावक	प्लावाक
	12	त्रैश्वर्यै	त्रैश्यैं
	13	सत्वचि	अभेदसंन
	14	वावच्छे	वानच्छे
	,,	वावयवे	वायवे

,,	त्तिविषयता	विशेष्यता
,,	भावनया	भावया
15	प्रियंच	प्रियश्च
,,	नात्म	नामा
3	पक्षके	पक्षक
,,	कामेशा	कामशा
,,	संग्रह	संहः
7	समर्थनं	सर्मथनं
,,	सुन्दर्युपा	सुन्युपा
,,	पूर्वका	पूवका
,,	परश्चेति	पराश्चेति
,,	त्तद्ध्या	त्तध्या
8	नन्ति	नन्ती
,,	ज्य ँस	ज्यँस्स
,,	ब्रह्मणो	ब्राह्मणो
,,	द्ब्रह्मणो	दाब्रह्मणो
,,	त्वात्परदेवता	तद्रूपत्वात्पर
9	मातृत्रया	तृत्रया
10	वयसो	वयस्यो
11	शक्ति	शाक्ति
,,	स्त्यपे	स्यपे
,,	परम	पर

,,	भिर्ब्रह्य	भिब्रह्य
12	दधि	दपि
14	विंशति	विंशात
15	बाह्य	बाह्म
,,	रूपत्व	रूपद्द
16	नानि	नाति
,,	पद्म	पद्य
17	सिद्धिमत्ते	द्धिमित्या
18	विशान्ति	विशान्ति
19	तिशतृप्रत्ययेन	तिबहि
21	माद्यां	मद्यां
,,	द्याजपेन	द्यानजपेन
22	चैच्छि	चैछिक
,,	तविद्या	ताविद्या
23	कराणि	करीण
25	षोडश	षौडश
26	मेर्कं	मेर्कं
29	पर्यवसान	वासान
31	जगत्कर्त्री	कतत्री
34	रुह्य	रुहय
43	युञ्जा	युञ्ञा
,,	त्सायं	त्प्रायं
,,	युञ्जा	युञ्ञा
46	ज्ञान	ज्ञानि
48	तमेव	तमेन
50	लब्ध्वा	लब्धा
51	स्तेरेव	स्तेवेव

विषयानुक्रमणिका

Printed at Sri Rama Press, Bangalore-4.

ओं

भद्रंकर्णेभिरितिशान्तिः

श्रीः

भावनोपनिषत् प्रयोगविधिसमेता

१. श्रीगुरुस्सर्वकारणभूता शक्तिः ॥

२. तेन नवरन्ध्ररूपो देहः ॥

अथ भावनोपनिषदा मुक्त्यै या भावनाः कथिताः ।
भास्कररायो रचयति तासामत्र प्रयोगविधिम् ॥

मूलेन प्राणानायम्य ऋष्यादिन्यासत्रयं कृत्वा

विवेकवृत्यवच्छिन्नचिच्छक्तिरूपसुषुम्नात्मने श्रीगुरवे नमः ॥

इति ब्रह्मरन्ध्रं स्पृष्ट्वा

दक्षश्रोत्ररूपपयस्विन्यात्मने प्रकाशानन्दनाथाय नमः
वामश्रोत्ररूपशङ्खिन्यात्मने विमर्शानन्दनाथाय नमः
जिह्वारूपसरस्वत्यात्मने अनन्तानन्दनाथाय नमः
दक्षनेत्ररूपपूषात्मने श्रीज्ञानानन्दनाथाय नमः ॥
वामनेत्ररूपगान्धार्यात्मने श्रीसत्यानन्दनाथाय नमः
ध्वजरूपकुहूात्मने श्रीपूर्णानन्दनाथाय नमः
दक्षनासारूपपिंगलात्मने स्वभावानन्दनाथाय नमः
वामनासारूपेडात्मने प्रतिभानन्दनाथाय नमः
पायुरूपालम्बुसात्मने सहजानन्दनाथाय नमः ।

इति तत्तत्स्थानानि संस्पृश्य

३. नवचक्ररूपं श्रीचक्रम् ॥

४. वाराहीपितृरूपा कुरुकुल्लाबलिदेवतामाता ॥

५. पुरुषार्थास्सागराः ॥ ६. देहो नवरत्नद्वीपः ॥

७. त्वगादिसप्तधातुरोमसंयुक्तः ॥

८. संकल्पाः कल्पतरवः तेजः कल्पकोद्यानम् ॥

नवचक्ररूप श्री चक्रात्मने देहाय नमः ।

पितृरूपास्थ्याद्यवयवात्मने वाराह्यै नमः ।

मातृरूपमांसाद्यवयवात्मने बलिदेवतायै कुरुकुल्लायै नमः ।

इति त्रिर्व्यापकं कृत्वा

देहपश्चाद्भागरूपधर्मात्मने इक्षुसागराय नमः

देहदक्षिणभागरूपार्थात्मने सुरासागराय नमः

देहप्राग्भागरूपकामात्मने घृतसागराय नमः

देहोदग्भागरूपमोक्षात्मने क्षीरसागराय नमः ॥

देहात्मने नवरत्नद्वीपाय नमः इति त्रिर्व्यापकं कृत्वा

१. मांसात्मने पुष्परागरत्नद्वीपाय नमः २. रोमात्मने नीलरत्नद्वीपाय नमः

३. त्वगात्मने वैडूर्यरत्नद्वीपाय नमः ४. रुधिरात्मने विद्रुमरत्नद्वीपाय नमः

५. शुक्रात्मने मौक्तिकरत्नद्वीपाय नमः ६. मज्जात्मने मरकतरत्नद्वीपाय नमः

७. अस्थ्यात्मने वज्ररत्नद्वीपाय नमः ८. मेद आत्मने गोमेदकरत्नद्वीपाय नमः

९. ओज आत्मने पद्मरागरत्नद्वीपाय नमः

१. मांसाधिदेवतायै कालचक्रेश्वर्यै नमः २. रोमाधिदेवतायैरुद्रचक्रेश्वर्यैनमः

३. त्वगधिदेवतायै मातृचक्रेश्वर्यै नमः ४. रुधिराधिदेवतायैरत्नचक्रेश्वर्यैनमः

९. रसनया भाव्यमाना मधुराम्लतिक्तकटुकषाय लवणरसाः षड्तवः ॥

११. ज्ञानमर्घ्यं ज्ञेयं हविःज्ञाता होता ज्ञातृज्ञान ज्ञेयानामभेदभावनं श्रीचक्रपूजनम् ॥

---

५. शुक्राधिदेवतायै दशारचक्रेश्वर्यै नमः ६. मज्जाधिदेवतायैगुरुचक्रेश्वर्यैनमः
७. अस्थ्यधिदेवतायै तत्वचक्रेश्वर्यैनमः८. मंदोधिदेवतायैग्रहचक्रेश्वर्यैनमः
९. ओजोधिदेवतायै मूर्तिचक्रेश्वर्यै नमः
सङ्कल्पात्मभ्यः कल्पतरुभ्यो नमः ॥ तेज आत्मने कल्पकोद्यानाय नमः ॥
मधुररसात्मने वसन्तर्तवे नमः । अम्लरसात्मने ग्रीष्मर्तवे नमः ॥
तिक्तरसात्मने वर्षर्तवे नमः । कटुरसात्मने शरदृतवे नमः ॥
कषायरसात्मने हेमन्तर्तवे नमः । लवणरसात्मने शिशिरर्तवे नमः ॥
इन्द्रियात्मभ्योऽश्वेभ्यो नमः । इन्द्रियार्थात्मभ्यो गजेभ्यो नमः ॥
करुणात्मिकायैतोयपरिखायै नमः । ओजःपुञ्जात्मने माणिक्यमण्टपायनमः
ज्ञानात्मने विशेषार्घ्याय नमः । ज्ञेयात्मने हविषे नमः ॥
ज्ञात्रात्मने होत्रे नमः । चिदात्मने श्रीमहात्रिपुरसुन्दर्यै नमः ॥

इति तत्तदनुसन्धानपूर्वकं मनसा नत्वा ज्ञातृज्ञानज्ञेयानां नामरूप-विलापनानुसन्धानेन चिन्मात्ररूपताविभावनेन क्षणं विश्रम्य ॥
पञ्चदश नित्या यजेत् । हृदिहस्तं निधाय ।

---

१. त्रिपुरा २. त्रिपुरेशी ३. त्रिपुरसुन्दरी ४. त्रिपुरवासिनी
५. त्रिपुराश्रीः ६. त्रिपुरमालिनी ७. त्रिपुरासिद्धा ८. त्रिपुराम्बा
९. महात्रिपुरसुन्दरी इति मतान्तरे चक्रेश्वरीनवकमाम्नातम् ॥

चत्वारिंशदधिकचतुर्दशशतश्वासात्मने प्रतिपत्तिथिरूपकामेश्वरीनित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने द्वितीयातिथिरूपभगमालिनी नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने तृतीयातिथिरूपनित्यक्लिन्ना नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने चतुर्थीतिथिरूपभेरुण्डा नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने पञ्चमीतिथिरूपवह्निवासिनी नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने षष्ठीतिथिरूपमहावज्रेश्वरी नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने सप्तमीतिथिरूप शिवदूती नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने अष्टमीतिथिरूप त्वरिता नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने नवमीतिथिरूप कुलसुन्दरी नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने दशमीतिथिरूप नित्या नित्यायै नमः ॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने एकादशीतिथिरूप नील पताका नित्यायै नमः ॥

११. नियतिः श्रृङ्गारादयो रसा अणिमादिसिद्धयः काम-क्रोधलोभमोहमदमात्सर्यपुण्यपापमयाब्राह्मयाद्यष्टशक्तयः।
१२. आधारनवकं मुद्राशक्तयः॥

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने द्वादशीतिथिरूप विजया नित्यायै नमः

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने त्रयोदशीतिथिरूप सर्व मंगला नित्यायै नमः

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने चतुर्दशीतिथिरूप ज्वाला मालिनी नित्यायै नमः

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने पौर्णमासीतिथिरूप चित्रा नित्यायै नमः

नित्यामन्त्रानपि तत्तदादौ केचित्पठन्ति इयं नित्याभावना सर्वान्त एव वा कार्या ॥ चतुरश्राद्यरेखायै नम इति वक्ष्यमाणस्थानेषु व्यापकं न्यस्य ॥

दक्षांसपृष्ठरूपशान्तरसात्मने अणिमासिध्यै नमः

दक्षपाण्यंगुल्यग्ररूपाद्भुतरसात्मने लघिमासिध्यै नमः

दक्षस्फिग्रूप करुणरसात्मने महिमा सिध्यै नमः

दक्षपादांगुल्यग्ररूप वीररसात्मने ईशित्व सिध्यै नमः

वामपादांगुल्यग्ररूप हास्यरसात्मने वशित्व सिध्यै नमः

वामस्फिग्रूपबीभत्सरसात्मने प्राकाम्य सिध्यै नमः

वामपाण्यंगुल्यग्ररूप रौद्ररसात्मने भुक्ति सिध्यै नमः

वामांसपृष्ठरूप भयानकरसात्मने इच्छा सिध्यै नमः

चूलीमूलरूप श्रृंगाररसात्मने प्राप्ति सिध्यै नमः

चूलीपृष्ठरूप नियत्यात्मने सर्वकाम सिध्यै नमः

चतुरश्रमध्यरेखायै नमः इति तदन्तर्व्यापकं न्यस्य
पादांगुष्ठद्वयरूप कामात्मने ब्राह्मयै नमः
दक्षपार्श्वरूप क्रोधात्मने माहेश्वर्यै नमः
मूर्धरूप लोभात्मने कौमार्यै नमः
वामपार्श्वरूपमोहात्मने वैष्णव्यै नमः
वामजानुरूपमदात्मने वाराह्यै नमः
दक्षजानुरूपमात्सर्यात्मने इन्द्राण्यै नमः
दक्षबहिरंसरूपपुण्यात्मने चामुण्डायै नमः
वामबहिरंसरूपपापात्मने महालक्ष्म्यै नमः
चतुरश्रान्त्यरेखायै नम इतितदन्तर्व्यापकं न्यस्य पादांगुष्ठद्वयरूपधस्सहस्र-दळकमलात्मने सर्वसंक्षोभिणीमुद्रायै नम
दक्षपार्श्वरूपमूलाधारात्मने सर्वाविद्राविणीमुद्राशक्त्यै नमः
मूर्धरूपस्वाधिष्ठानात्मने सर्वाकर्षिणी मुद्राशक्त्यै नमः
वामपार्श्वरूपमणिपूरात्मने सर्ववशङ्करी मुद्राशक्त्यै नमः
वामजानुरूपानाहतात्मने सर्वोन्मादिनी मुद्राशक्त्यै नमः
दक्षजानुरूप विशुध्यात्मने सर्वमहाङ्कुशा मुद्राशक्त्यै नमः
दक्षोरुरूपेन्द्रयोन्यात्मने सर्वखेचरी मुद्राशक्त्यै नमः
वामोरुरूपाज्ञात्मने सर्वबीज मुद्राशक्त्यै नमः
द्वादशान्तरूपोर्ध्वसहस्रदलकमलात्मने सर्वयोनि मुद्रायै नमः
पादांगुष्ठरूपाधारनवकात्मने सर्वत्रिखण्डा मुद्रायै नमः
हृद्रूपत्रैलोक्यमोहनचक्रेश्वर्यैत्रिपुरायैनमः इति तत्तत्स्थानानि स्पृष्ट्वा एतास्सर्वास्स्वात्माभिन्नत्वेन विभाव्य आत्मनः अपरिच्छिन्नत्वं भावयेत्
प्रकटयोगिनीरूपस्वात्मने अणिमासिध्यै नमः ॥

१३. पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानि मनोविकारः कामाकर्षिण्यादिषोडशशक्तयः ॥

अपरिच्छिन्नस्वात्मात्मने सर्वसंक्षोभिणीमुद्रायै नमः इति प्रयोगपूर्वकं वा विभावयेत् ॥ षोडशदळपद्माय नम इति तदन्तर्व्यापकं न्यस्य
दक्षश्रोत्रपृष्ठरूप पृथिव्यात्मने कामाकर्षिणीनित्याकलायै नमः
दक्षांसरूपाब्रात्मने बुद्ध्याकर्षिणीनित्याकलायै नमः
दक्षकूर्पररूपतेज आत्मने अहंकाराकर्षिणीनित्याकलायै नमः
दक्षकरपृष्ठरूपवाय्वात्मने शब्दाकर्षिणी नित्याकलायै नमः
दक्षोरुरूपाकाशात्मने स्पर्शाकर्षिणी नित्याकलायै नमः
दक्षजानुरूपश्रोत्रात्मने रूपाकर्षिणी नित्याकलायै नमः
दक्षगुल्फरूपत्वगात्मने रसाकर्षिणी नित्याकलायै नमः
दक्षपादतलरूपचक्षुरात्मने गन्धाकर्षिणी नित्याकलायै नमः
वामपादतलरूपजिह्वात्मने चित्ताकर्षिणी नित्याकलायै नमः ॥
वामगुल्फरूपघ्राणात्मने धैर्याकर्षिणी नित्याकलायै नमः
वामजानुरूपवागात्मने स्मृत्याकर्षिणी नित्याकलायै नमः
वामोरुरूपपाण्यात्मने नामाकर्षिणी नित्याकलायै नमः
वामकरपृष्ठरूपपादात्मने बीजाकर्षिणी नित्याकलायै नमः
वामकूर्पररूपपाय्वात्मने आत्माकर्षिणी नित्याकलायै नमः
वामांसरूपोपस्थात्मने अमृताकर्षिणी नित्याकलायै नमः
वामश्रोत्रपृष्ठरूपविकृतमन आत्मने शरीराकर्षिणी नित्याकलायै नमः
हृद्रूपसर्वाशापरिपूरकचक्रेश्वर्यै त्रिपुरेश्वर्यै नमः ॥

१४. वचनादानगमनविसर्गानन्दहानोपादानोपेक्षाख्य-
बुद्धयोऽनङ्गकुसुमाद्यष्टौ ॥

१५. अलंबुसाकुहूविश्वोदरवारुणीहस्तिजिह्वायशोवती-
पयस्विनीगान्धारीपूषाशंखिनीसरस्वतीइडापिंगलासुषुम्नाचे-
ति चतुर्दशनाड्यः सर्वसंक्षोभिण्यादि चतुर्दश शक्तयः ॥

गुप्तयोगिनी रूपस्वात्मने लघिमासिध्यै नमः ॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वविद्राविणी मुद्रायै नमः
अष्टदळपद्माय नम इति तदन्तर्व्यापकं न्यस्य
दक्षशंखरूपवचनात्मने अनङ्गकुसुमायै नमः
दक्षजत्रुरूपादानात्मने अनङ्गमेखलायै नमः
दक्षोरुरूपगमनात्मने अनङ्गमदनायै नमः
दक्षगुल्फरूपविसर्गात्मने अनङ्गमदनातुरायै नमः
वामगुल्फरूपानन्दात्मने अनङ्गरेखायै नमः
वामोरुरूपहानाख्यबुध्यात्मने अनङ्गवेगायै नमः
वामजत्रुरूपोपादानाख्यबुध्यात्मने अनङ्गाङ्कुशायै नमः
वामशंखरूपोपेक्षाख्यबुध्यात्मने अनङ्गमालिन्यै नमः ।
हृद्रूपसर्वसंक्षोभणचक्रेश्वर्यै त्रिपुरसुन्दर्यै नमः ।
गुप्ततरयोगिनीरूपस्वात्मात्मने महिमासिध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने सर्वाकर्षिणी मुद्रायै नमः ।
चतुर्दशारचक्राय नम इति तदन्तर्व्यापकं न्यस्य ।
ललाटमध्यभागरूपालंबुसात्मने सर्वसंक्षोभिणीशक्त्यै नमः ।

१६. प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्त-धनञ्जयादशवायवस्सर्वसिद्धिप्रदादिबहिर्दशारदेवताः ॥

ललाटदक्षभागरूपकुह्वात्मने सर्वविद्राविणी शक्त्यै नमः ॥
दक्षगण्डरूपविश्वोदरात्मने सर्वाकर्षिणी शक्त्यै नमः ॥
दक्षांसरूपवारुण्यात्मने सर्वाह्लादिनी शक्त्यै नमः ॥
दक्षपार्श्वरूप हस्तिजिह्वात्मने सर्वसंमोहिनी शक्त्यै नमः ॥
दक्षोरुरूपयशोवत्यात्मने सर्वस्तंभिनी शक्त्यै नमः ॥
दक्षजंघारूपपयस्विन्यात्मने सर्वजृम्भिणीशक्त्यै नमः ॥
वामजंघारूपगान्धार्यात्मने सर्ववशंकरी शक्त्यै नमः ॥
वामोरुरूपपूषात्मने सर्वरञ्जिनी शक्त्यै नमः ॥
वामपार्श्वरूपशंखिन्यात्मने सर्वोन्मादिनी शक्त्यै नमः ॥
वामांसरूपसरस्वत्यात्मने सर्वार्थसाधिनी शक्त्यै नमः ॥
वामगंडरूपेडात्मने सर्वसंपत्तिपूरणी शक्त्यै नमः ॥
ललाटवामभागरूपपिंगळात्मने सर्वमन्त्रमयी शक्त्यै नमः ॥
ललाटपृष्ठभागरूपसुषुम्नात्मने सर्वद्वन्द्वक्षयंकरी शक्त्यै नमः ॥
हृद्रूपसर्वसौभाग्यदायकचक्रेश्वर्यै त्रिपुरवासिन्यै नमः ॥
सम्प्रदाययोगिनीरूपस्वात्मात्मने ईशित्वसिध्यै नमः ॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्ववशंकरी मुद्रायै नमः ॥

बहिर्दशारचक्राय नम इति व्यापकं न्यस्य ।
दक्षाक्षिरूपप्राणात्मने सर्वसिद्धिप्रदादेव्यै नमः ॥
नासामूलरूपापानात्मने सर्वसम्पत्प्रदादेव्यै नमः ॥

१७. एतद्वायुसंसर्गकोपाधिभेदेन रेचकः पाचकश्शोषको दाहकः प्लावक इति प्राणमुख्यत्वेन पञ्चधा जठराग्निर्भवति १८. क्षारक उद्गारकः क्षोभको जृम्भको मोहकः इति नाग-प्राधान्येन पञ्चविधाः ते मनुष्याणां देहगाः भक्ष्यभोज्य-चोष्यलेह्यपेयात्मकपञ्चविधमन्नं पाचयन्ति ॥

१९. एता दशवह्निकलास्सर्वज्ञाद्या अन्तर्दशारगा देवताः

वामनेत्ररूपव्यानात्मने सर्वप्रियङ्करीदेव्यै नमः ॥
कुक्षीशकोणरूपोदानात्मने सर्वमङ्गळकारिणी देव्यै नमः ॥
कुक्षिवायुकोणरूपसमानात्मने सर्वकामप्रदादेव्यै नमः ॥
वामजानुरूपनागात्मने सर्वदुःखविमोचिनीदेव्यै नमः ॥
गुदरूपकूर्मात्मने सर्वमृत्युप्रशमनी देव्यै नमः ॥
दक्षजानुरूपकृकरात्मने सर्वविघ्नविनाशिनी देव्यै नमः ॥
कुक्षिनिर्ऋतिकोणरूपदेवदत्तात्मने सर्वांगसुन्दरी देव्यै नमः ॥
कुक्षिवह्निकोणरूपधनञ्जयात्मने सर्वसौभाग्यदायिनीदेव्यै नमः ॥
हृद्रूपसर्वार्थसाधकचक्रेश्वर्यै त्रिपुराश्रियै नमः ॥
कुलकौलयोगिनीरूपस्वात्मात्मने वशित्वसिध्यै नमः ॥
अपरिच्छिन्नस्वात्मात्मने सर्वोन्मादिनीमुद्रायै नमः ॥
अन्तर्दशारचक्राय नम इति तदन्तर्व्यापकं न्यस्य ॥
दक्षनासारूपरेचकाग्न्यात्मने सर्वज्ञादेव्यै नमः ॥
दक्षसृक्किरूपपाचकाग्न्यात्मने सर्वशक्तिदेव्यै नमः ॥

२०. शीतोष्णसुखदुःखेच्छास्सत्वंरजस्तमोवशिन्यादि शक्तयोष्टौ ॥

दक्षस्तनरूपशोषकाग्न्यात्मने सर्वैश्वर्यप्रदादेव्यै नमः ॥
दक्षवृषणरूपदाहकाग्न्यात्मने सर्वज्ञानमयी देव्यै नमः ॥
सीविनीरूपप्लवकाग्न्यात्मने सर्वव्याधिविनाशिनी देव्यै नमः ॥
वामवृषणरूपक्षारकाग्न्यात्मने सर्वाधारस्वरूपादेव्यै नमः ॥
वामस्तनरूपोद्गारकाग्न्यात्मने सर्वपापहरादेव्यै नमः ॥
वामसृक्किरूपक्षोभकाग्न्यात्मने सर्वानन्दमयीदेव्यै नमः ॥
वामनासारूपजृम्भकाग्न्यात्मने सर्वरक्षास्वरूपिणीदेव्यै नमः ॥
नासाग्ररूपमोहकाग्न्यात्मने सर्वेप्सितफलप्रदादेव्यै नमः ॥
हृद्रूपसर्वरक्षाकरचक्रेश्वर्यै त्रिपुरमालिन्यै नमः ॥
निगर्भयोगिनीरूपस्वात्मात्मने प्राकाम्यसिध्यै नमः ॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वमहाङ्कुशामुद्रायै नमः ॥

अष्टकोणचक्राय नम इति तदन्तर्व्यापकं न्यस्य
चिबुकदक्षभागरूपशीतात्मनेवशिनी वाग्देवतायै नमः ॥
कण्ठदक्षभागरूपोष्णात्मने कामेश्वरीवाग्देवतायै नमः ॥
हृदयदक्षभागरूपसुखात्मने मोदिनीवाग्देवतायै नमः ॥
नाभिदक्षभागरूपदुःखात्मने विमलावाग्देवतायै नमः ॥
नाभिवामभागरूपेच्छात्मने अरुणावाग्देवतायै नमः ॥
हृदयवामभागरूपसत्वगुणात्मने जयिनीवाग्देवतायै नमः ॥
कण्ठवामभागरूपरजोगुणात्मने सर्वेश्वरीवाग्देवतायै नमः ॥

२१. शब्दादितन्मात्राः पञ्चपुष्पबाणाः ॥
२२. मन इक्षुधनुः २३. रागः पाशः २४. द्वेषोंकुशः
२५. अव्यक्तमहदहङ्काराःकामेश्वरीवज्रेश्वरीभगमालिन्यो-
न्तस्त्रिकोणगा देवताः ।

चिबुकवामभागरूपतमोगुणात्मने कौलिनीवाग्देवतायै नमः ॥
हृद्रूपसर्वरोगहरचक्रेश्वर्यै त्रिपुरासिद्धायै नमः ॥
रहस्ययोगिनीरूपस्वात्मात्मने भुक्तिसिध्यै नमः ॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वखेचरीमुद्रायै नमः ॥

हृदयत्रिकोणाधोभागरूपपञ्चतन्मात्रात्मकेभ्यः सर्वजम्भनबाणेभ्यो नमः ॥
तद्दक्षभागरूपमन आत्मकाभ्यां सर्वमोहनधनुर्भ्यां नमः ॥
तदूर्ध्वभागरूपरागात्मकाभ्यां सर्ववशंकरपाशाभ्यां नमः ॥
तद्वामभागरूपद्वेषात्मकाभ्यां सर्वस्तम्भकराङ्कुशाभ्यां नमः ॥

त्रिकोणचक्राय नम इति व्यापकं न्यस्य
हृदयत्रिकोणाग्रभागरूपमहत्तत्वात्मने कामेश्वर्यै देव्यै नमः ॥
तद्दक्षकोणरूपाहंकारात्मने वज्रेश्वर्यै देव्यै नमः ॥
तद्वामकोणरूपाव्यक्तात्मने भगमालिनी देव्यै नमः ॥
हृद्रूपसर्वसिद्धिप्रदचक्रेश्वर्यै त्रिपुरांबायै नमः ॥
अतिरहस्ययोगिनीरूपस्वात्मात्मने इच्छासिध्यै नमः ॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वबीजमुद्रायै नमः ॥
बिन्दुचक्राय नम इति व्यापकं न्यस्य

२६. निरुपाधिकसंविदेव कामेश्वरः ॥

२७. सदानन्दपूर्णः स्वात्मैव परदेवता ललिता ॥

२८. लौहित्यमेतस्य सर्वस्य विमर्शः ॥ २९. अनन्यचित्तत्वेन च सिद्धिः ३० भावनायाः क्रियोपचारः ॥

हृन्मध्यरूपनिरुपाधिकसंविन्मात्ररूपकामेश्वरांकनिलयायै सच्चिदानन्दैकब्रह्मात्मिकायै परदेवतायै ललितायै महात्रिपुरसुन्दर्यै नमः ॥

निरुपाधिकचैतन्यमेव सच्चिदानन्दात्मकमन्तःकरणप्रतिबिंबितंसत्तदहमेवेत्यनुसन्धानं ललितायालौहित्यमिति विभाव्य ॥

अभेदसंबन्धेन सत्वांचत्वादि विशिष्टसंविदः केवलसंविदश्च तादात्म्यसम्बन्धरूपं कामेश्वरांकयन्त्रणंविशेषणं विभाव्य ॥

उपाध्यभावरूपशुक्लत्वोपलक्षिता सतीशुद्धसंविदेव शुक्लचरणः ॥

चित्वविशिष्टसंवित्प्राथमिकपराहन्तात्मकमृत्युरूपेणरागेणोपलक्षितासती-रक्तचरणः ॥

अहमाकारवृत्तिनिरूपिता विषयता चरणयोर्मिथो विशेष्यविशेषणभावरूपैव तदुभयसामरस्यमिति विभाव्य ॥

हृद्रूपसर्वानन्दमयचक्रेश्वर्यै महात्रिपुरसुन्दर्यै नमः ॥

परापररहस्ययोगिनीरूपस्वात्मात्मने प्राप्तिसिध्यै नमः ॥

अपरिच्छिन्नरूपस्वात्मात्मने सर्वयोनिमुद्रायै नमः ॥

इति तत्तत्स्थानस्पर्शपूर्वकं सम्यगनुसन्धायोपचारान् समर्पयेत् ॥

तद्यथा-एवमपरिच्छिन्नतया भाविताया ललितायाःस्वेमहिम्न्येवप्रतिष्ठितिमासनमनुसन्धामि ॥

वियदादिस्थूलप्रपञ्चरूपपादगतनामरूपात्मकमलस्य सच्चिदानन्दैकरूपत्व भावनाजलेन क्षाळनं पाद्यं भावयामि ॥

सूक्ष्मप्रपञ्चरूपहस्तगतस्य तस्य क्षाळनमर्घ्यं चिन्तयामि ॥

भावनारूपाणामपामपि कबलीकाररूपमाचमनं भावयामि ॥

सत्त्वचित्त्वानन्दत्वाद्यखिलावयवावच्छेदेन भावनाजलसम्पर्करूपं-स्नानमनुचिन्तयामि ॥

तेष्वेवावयवेषु प्रसक्ताया भावनात्मकवृत्तिविशेष्यतायाः प्रोञ्छनं वृत्य-विषयत्वभावनेन वस्त्रं कल्पयामि ॥

निर्विषयत्वनिरञ्जनत्वाशोकत्वामृतत्वाद्यनेकधर्मरूपाण्याभरणानि धर्म्यभेद-भावनेन समर्पयामि ॥

स्वशरीरघटकपार्थिवभागानां जडतापनयेन चिन्मात्रतावशेषरूपं गन्धं प्रयच्छामि ॥

आकाशभागानां तथा भावनेन पुष्पाणि समर्पयामि ॥

वायव्यभागानान्तथाभावनया धूपयामि ॥

तैजसभागानान्तथाकरणेनोद्दीपयामि ॥

अमृतभागांस्तथा विभाव्य निवेदयामि ॥

षोडशान्तेन्दुमण्डलस्य तथा भावनेन ताम्बूलकल्पमाचरामि ॥

परापश्यन्त्यादिनिखिलशब्दानां नादद्वारा ब्रह्मण्युपसंहारचिन्तनेन स्तवीमि ॥

विषयेषु धावमानानां चित्तवृत्तीनां विषयजडतानिरासेन ब्रह्मणि प्रविलाप-नेन प्रदक्षिणीकरोमि ॥

तासां विषयेभ्यः परावर्तनेन ब्रह्मैकप्रवणतया प्रणमामि ॥

इत्युपचर्य जुहुयात् ॥

३१. अहं त्वमस्ति नास्ति कर्तव्यमकर्तव्यमुपासितव्य-मित्यादि विकल्पानां आत्मनि विलापनं होमः ॥

३२. भावनाविषयाणामभेदभावनन्तर्पणम् ॥

३३. पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनम् ॥

३४. एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावना-परो जीवन्मुक्तो भवति स एव शिवयोगीति गद्यते ॥

३५. कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ॥

३६. य एवं वेद सोथर्वशिरोधीते ॥ इति भावनोपनिषत्

विहिताविहितविषयावृत्तयःउत्पन्नाः अहं त्वं गुरुर्देवतेत्यादयः तास्सर्वा-श्चक्रराजस्थानन्तशक्तिकदम्बरूपास्तत्तत्सूक्ष्मरूपा ये ये संस्कारास्तत्सर्वं चिन्मात्रमेवेति विभावनया निर्व्युत्थानं स्वात्मनि जुहोमि ॥

प्रकृतभावनासु ये गुरुचरणादिशक्तिकदम्बान्ताविषयास्ते सर्वेपि चिन्मात्र रूपान परस्परं भिद्यन्ते इति भावनया तर्पयामि ॥

तिथिचक्रमुक्तरूपं कालचक्रं देशचक्रं च सर्वमस्ति भाति प्रियं च न तु नामरूप बदतस्सर्वं ब्रह्मैवेति विभावयामि ॥

अथवा पूर्वलिखितां नित्याभावनामिहैव श्वासप्रविलापनफलिकां कुर्यात् तेन मनः पवनात्मनामैक्यनिभालनेन त्रीन्मुहूर्तान् द्वावेकं वा मुहूर्तम-विच्छिन्नं व्यापयेत् । तस्य देवतात्मैक्यसिद्धिः चिन्तितकार्याण्ययत्नेन सिध्यन्ति ॥

ततोवतीर्य प्राणायामत्रयमृष्यादिन्यासत्रयञ्च कृत्वा गुरुं स्तुवीतेति सर्वं शिवम् ॥

अथर्वशिरसि प्रोक्तभावनानां सतां मुदे ।
इति भास्कररायेण प्रयोगविधिरीरितः ॥

श्यामे सगीतमातः परशिवनिलये मुख्यसाचिव्यभारो
द्वाहे दक्षे दयापूरितनिजहृदये मामकीं दैन्यवृत्तिम् ।
श्रीमत्सिंहासनेश्वर्यां भववनपतितान्दावदग्धान्नमस्ते-
त्रातुं पीयूषवर्षैः कथय परिकरं बद्धवत्यां विविक्ते ॥

यत्रास्ति भोगो न च तत्र मोक्षः यत्रास्ति मोक्षो न च तत्र भोगः ।
श्रीसुन्दरीसाधकपुंगवानां भोगश्च मोक्षश्च करस्थ एव ॥

पातय वा पाताले स्थापय वा सकललोकसाम्राज्ये ।
मातस्तवांघ्रियुगलं नाहं मुञ्चामि नैव मुञ्चामि ॥

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गळा ।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गळम् ॥

दुर्गे शिवेऽभये माये नारायणि सनातनि ।
जये मे मङ्गळं देहि नमस्ते सर्वमङ्गळे ॥ इति श्रीः ॥

श्रीतन्त्रराजे पञ्चत्रिंशपटले भावनोपनिषत्प्रतिपादित महायागक्रमस्योपब्रह्मणश्लोकाः

अथ षोडशनित्यानां स्वात्मत्वे वासनां शृणु 1
यया तन्मयतासिद्धिः प्रत्यक्षा भवति ध्रुवम् ॥
गुरुराद्या भवेच्छक्तिः सा विमर्शमयीमता
नवत्वं तस्य, देहस्य, रन्ध्रत्वेनावभासते ॥ 2
बलिदेव्यः, स्वमायाः स्युः पञ्चमी जनकात्मिका
कुरुकुल्ला भवेन्माता पुरुषार्थास्तु सागराः ॥ 3
रत्नद्वीपो भवेद्देहो नवत्वं धातुरोमभिः
संकल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः ॥ 4
ग्रहर्क्षराशिचक्रेण कालात्मा पश्चिमामुखः
तेन पूर्वाभिमुख्यं स्यादन्यत्ते कथितं मिथः ॥ 5
ज्ञाता स्वात्मा भवेत् ज्ञानमर्घ्यं ज्ञेयं बहिः स्थितम्
श्रीचक्रपूजनं तेषामेकीकरणमीरितम् ॥ 6
श्रीचक्रे सिद्धयः प्रोक्ता रसा नियतिसंयुताः
ऊर्मयः पुण्यपापे च ब्राह्मयाद्या मातरः स्मृताः ॥ 7
भूतेन्द्रियमनांस्येव क्रमान्नित्याकलाः पुनः
कर्मेन्द्रियार्था दोषाश्च ज्ञेयाः स्युः शक्तयोष्ट वै ॥ 8
नाड्यश्चतुर्दश प्रोक्ताः क्षोभिण्याद्यास्तु शक्तयः
वायवो दशसंप्रोक्ताः सर्वसिध्यादिशक्तयः ॥ 9
वह्नयोदशसंप्रोक्ताः सर्वज्ञाद्यास्तु शक्तयः
शीतोष्णसुखदुःखेच्छा गुणाः प्रोक्ताः क्रमेण वै ॥ 10
वशिन्याद्याश्शक्तयः स्युः तन्मात्राः पुष्पसायकाः

मनोभवेदिक्षुधनुः पाशोराग इतीरितः ॥ 11
द्वेषः स्यादङ्कुशः प्रोक्तः क्रमेण वरवर्णिनि
अव्यक्ताहङ्कृतिमहदाकाराः प्रतिलोमतः ॥ 12
कामेश्वर्यादिदेव्यस्स्युः संवित्कामेश्वरः स्मृतः
स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा ॥ 13
लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावना
सिद्धिस्त्वनन्यचित्तत्वं मुद्रा वैभवभावनम् ॥ 14
उपचाराश्चलत्वेपि तन्मयत्वाप्रमत्तता
प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम् ॥ 15
यन्त्राणि मन्त्रास्सर्वत्र स्वात्मत्वे स्थैर्यसाधनं
सन्ध्यासु भजनं देव्या आदिमध्यान्तमज्जनं ॥ 16
अन्यास्तु शक्तयश्चक्रगामिन्यो यास्समन्ततः
तास्तु विश्वविकल्पानां हेतवस्समुदीरिताः ॥ 17
न्यासस्तु देवतात्वेन स्वात्मनो देहकल्पनम्
जपस्तन्मयतारूपभावनं सम्यगीरितम् ॥ 18
होमो विश्वविकल्पानां स्वात्मन्यस्तमयो मतः
तेषामन्योन्यसंभेदभावनं तर्पणं भवेत् ॥ 19
मोहाज्ञानादिदुःखानामात्मन्यस्तमयो दृढम्
अभिषेकस्तु विद्यास्यादात्मा सर्वाश्रयो महान् ॥ 20
उपाधीनान्तु राहित्यं उपदेश इतीरितः
दक्षिणाभेदशून्यत्वं शुश्रूषा स्थैर्यमुच्यते ॥ 21
तिथिरूपेण कालस्य परिणामावलोकनम्
नित्याः पञ्चदशैताः स्युरितिप्रोक्तास्तु वासनाः ॥ इति श्रीः ॥

श्रीललिताचतुष्षष्ट्युपचार संग्रहः

ओं ॥ हृन्मध्यनिलये देवि ललिते परदेवते ।
चतुष्षष्ट्युपचारांस्ते भक्त्या मातस्समर्पये ॥ १ ॥
कामेशोत्संगनिलये पाद्यं गृह्णीष्व सादरम् ।
भूषणानि समुत्तार्य गन्धतैलं च तेऽर्पये ॥ २ ॥
स्नानशालां प्रविश्याथ तत्रत्य मणिपीठके ।
उपविश्य सुखेन त्वं देहोद्वर्तनमाचर ॥ ३ ॥
उष्णोदकेन ललिते स्नापयाम्यथ भक्तितः ।
अभिषिञ्चामि पश्चात्त्वां सौवर्णकलशोदकैः ॥ ४ ॥
धौतवस्त्रप्रोञ्छनं चारक्तक्षौमांबरं तथा ।
कुचोत्तरीयमरुणमर्पयामि महेश्वरि ॥ ५ ॥
ततः प्रविश्य चालेपमण्टपं परमेश्वरि ।
उपविश्य च सौवर्णपीठे गन्धान्विलेपय ॥ ६ ॥
कालागरुजधूपैश्च धूपये केशपाशकम् ।
अर्पयामि च मल्ल्यादि सर्वर्तुकुसुमस्रजः ॥ ७ ॥
भूषामण्टपमाविश्य स्थित्वा सौवर्णपीठके ।
माणिक्यमकुटं मूर्ध्नि दयया स्थापयांबिके ॥ ८ ॥
शरत्पार्वणचन्द्रस्य शकलं तत्र शोभताम् ।
सिन्दूरेण च सीमन्तमलङ्कुरु दयानिधे ॥ ९ ॥

फाले च तिलकं न्यस्य नेत्रयोरञ्जनं शिवे ।
वालीयुगळमप्यम्ब भक्त्या ते विनिवेदये ॥ १० ॥
मणिकुण्डलमप्यम्ब नासाभरणमेव च ।
ताटङ्कयुगळं देवि यावकञ्चाधरेऽर्पये ॥ ११ ॥
आद्यभूषणसौवर्णचिन्ताकपदकानि च ।
महापदकमुक्तावल्येकवल्यादिभूषणम् ॥ १२ ॥
छन्नवीरं गृहाणाम्ब केयूरयुगळन्तथा ।
वलयावलिमंगुल्याभरणं ललिताम्बिके ॥ १३ ॥
ओड्याणमथकटयान्ते कटिसूत्रं च सुन्दरि ।
सौभाग्याभरणं पादकटकं नूपुरद्वयम् ॥ १४ ॥
अर्पयामि जगन्मातः पादयोश्चांगुलीयकम् ।
पाशं वामोर्ध्वहस्ते ते दक्षहस्ते तथाङ्कुशम् ॥ १५ ॥
अन्यस्मिन्वामहस्ते च तथा पुंण्ड्रेक्षुचापकम् ।
पुष्पबाणांश्च दक्षाधः पाणौ धारय सुन्दरि ॥ १६ ॥
अर्पयामि च माणिक्यपादुके पादयोश्शिवे ।
आरोहावृतिदेवीभिश्चक्रं परशिवे मुदा ॥ १७ ॥
समानवेषभूषाभिस्साकं त्रिपुरसुन्दरि ।
तत्र कामेशवामाङ्कपर्यङ्कोपनिवेशिनीम् ॥ १८ ॥
अमृतासवपानेन मुदितां त्वां सदा भजे ।
शुद्धेन गांगतोयेन पुनराचमनं कुरु ॥ १९ ॥
कर्पूरवीटिकामास्ये ततोंब विनिवेशय ।
आनन्दोल्लासहासेन विलसन्मुखपङ्कजाम् ॥ २० ॥

भक्तिमत्कल्पलतिकां कृतीस्यां त्वां स्मरन् कदा ।
मङ्गळारार्तिकं छत्रं चामरं दर्पणन्तथा ॥ २१ ॥
ताळवृन्तं गन्धपुष्पधूपदीपांश्च तेऽर्पये ॥
श्रीकामेश्वरितप्तहाटककृतैःस्थालीसहस्रैर्भृतं
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदैर्युतम् ।
दुग्धान्नं मधुशर्करादधियुतं माणिक्यपात्रार्पितं
माषापूरकपूरिकादिसहितं नैवेद्यमम्बार्पये ॥ २२ ॥
साग्रविंशतिपद्योक्तचतुष्षष्ट्युपचारतः ।
हृन्मध्यनिलया माता ललिता परितृप्यतु ॥ २३ ॥
श्रीमुखाख्यस्य वर्षस्य तुलायां शुक्लपक्षके ।
चतुर्थ्यामपराह्णे च ललितार्पितमानसः ॥ २४ ॥
साग्रविंशतिपद्यैस्तु चतुष्षष्ट्युपचारकान् ।
समग्रहीत् पराम्बायाः प्रीत्यै नारायणो मुदा ॥ २५ ॥
नारायणःश्रीपुरुषोत्तमात्मजोऽलिखन्महीशूरपुरेवसन्कृती ।
देवीसपर्यामखिलाभिलाषदां कामेशवामाङ्कगता प्रसीदतु ॥ २६ ॥
ओंतत्सदिति श्रीः ॥ इति देवी चतुष्षष्ट्युपचारसंग्रहः सम्पूर्णः ॥

अथ त्रिपुरोपनिषदः शान्तिमन्त्र पाठः

(भाष्यसमेतः)

ओं वाङ्मे मनसि प्रतिष्ठिता-मनो मे वाचि प्रतिष्ठितम् ॥

तत्वविद्याप्रतिपादकग्रन्थपाठे प्रवृत्ता मे वाक् सर्वदा मनसि प्रतिष्ठिता मनो विवक्षितशब्दजातप्रतिपादिकेति यावत् ॥ मनश्च मदीयं वाचि प्रतिष्ठितं-आत्मविद्याप्रतिपादकमेव शब्दजातं मनसा विवक्ष्यते। अन्योन्यानुगृहीते हि वाङ्मनसे विद्यार्थग्रन्थं साकल्येनावधारयितुं शक्नुतः। मनसस्सावधानत्वाभावे यत्किंचिदसंगतं ब्रूयात्-तथा वाचः पाटवाभावे विवक्षितं न यथावदुच्चार्यते-अतस्तयोः परस्परानुकूल्यप्रार्थना क्रियते इति भावः ॥

आविरावीर्म एधि ॥

आविश्शब्देन स्वप्रकाशं ब्रह्मचैतन्यमुच्यते ॥ हे परमात्मन् मे आविरेधि। अविद्यावरणापनयेन मे प्रकटीभवेत्यर्थः ॥

वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीः ॥

हे वाङ्मनसे तत्वविद्याप्रतिपादकवेदग्रन्थस्य-मे-मदर्थं आणी-आनयनसमर्थे भवतमित्यर्थः। हे श्रोत्रेन्द्रिय मदर्थं त्वया श्रुतं ग्रन्थजातं मा प्रहासीः मा विस्मरेत्यर्थः ॥

अनेनाधीतेनाहोरात्रान् सन्दधामि ऋतं वदिष्यामि । सत्यं वदिष्यामि ॥

अनेनाधीतेनोपनिषद्ग्रन्थेन विस्मरणरहितेनाहोरात्रान् संयोजयामि। अहनि रात्रौ चालस्यं परित्यज्य निरन्तरं पठामीत्यर्थः ॥ पठिते च ग्रन्थे ऋतं-परमार्थभूतं वस्तु वदिष्यामि- विपरीतार्थवदनं कदाचिदपि माभूदित्यर्थः ॥ ऋतं-मानसं-सत्यं-वाचिकं-मनसा वस्तुतत्वं विचार्य वाचा वदिष्यामीत्यर्थः ।

तन्मामवतु तद्वक्तारमवतु अवतुमामवतुवक्तारमवतुवक्तारं ओं शान्तिश्शान्तिश्शान्तिः ॥

तद्ब्रह्मतत्वं मां शिष्यं सम्यग्बोधेन पालयतु-आचार्यञ्च बोधकत्वसामर्थ्य-प्रदानेन पालयतु ॥ पुनरप्यवतुमामिति फलप्रार्थना-अविद्यानिवृत्तिविषयिणी क्रियते-आचार्यस्यतु तादृशशिष्यलाभेन विद्यासम्प्रदायाविच्छेदलाभः फलम् ॥ अनेन मन्त्रपाठेन पूर्वं विद्याप्रतिबन्धकविघ्नाः परिह्रियन्ते विद्योत्पत्तेरूर्ध्वन्तु असम्भावनाविपरीतभावनोत्पादकविघ्नाः ॥

अभ्यासोऽध्यायसमाप्तयद्योतकः ॥ इति शान्तिमन्त्रार्थः ॥ श्रीः ॥

श्रीत्रिपुरोपनिषत् (भाष्यसहिता)

सहस्रदलपद्मे स्वे नाथांघ्रयब्जद्वये सति ।
कमले कमलोत्पत्तिर्नदृष्टेत्युक्तयः कथम् ॥
श्रीसांख्यायनकल्पसूत्रविधिभिःकर्माणि ये कुर्वते-
येषां शाकल एव मन्त्रनिचयः कौषीतकं ब्राह्मणम् ।
तैरारण्यकमध्यमन्त्रविततिर्या पठ्यते बह्वृचैः
ऋग्भिष्षोडशभिर्महोपनिषदं व्याचक्ष्महे तां वयम् ॥

इह खलु त्रैवर्णिकैरध्येतव्यो वेदः पूर्वोत्तरकाण्डभेदेन द्विविधः ॥
स उभयविधोपि साक्षात्परम्परया वा क्रियाविशेषविधानाय प्रवृत्तः ॥
क्रियाश्च काश्चित्सदेवताकाः काश्चिन्निर्देवताकाः-अग्निहोत्र
स्नानादयो यथा रामकृष्णोपास्ति योषिदग्न्युपास्त्यादयश्च ॥
अधिकारिणस्तु देहातिरिक्त आत्मापरलोकयातायातक्षमोस्तीति विश्वासशीला एवामुष्मिकफलक्रियासु यथाधिक्रियन्ते तथा तेष्वपि देवतानामास्मदादिभिरदृश्यमानाप्यभिमतफलदानक्षमा काचिदस्तीति विश्वासशीला एव रामकृष्णाद्युपास्तावधिक्रियन्ते ॥ ईदृश जनाभिप्रायेणैव देवतानां विग्रहादिपञ्चकं समर्थितं बादरायणादिभिः ॥ येषान्तु देवतासद्भावे जन्मान्तरकर्मवशादनाश्वासः आस्तिकता च ते पूर्वकाण्डोक्तकर्मस्वेवाधिकारिणः न देवतोपासनायां-तादृशजनाभिप्रायेणैव देवतानां विग्रहादिपञ्चकनिरासेन कर्मप्राधान्यवादस्समर्थितो जैमिन्यादिभिः । अतएव तादृश कर्मठानामेव कर्मपरिपाकवशात्कतिपयानां शिवशक्तिपूजायां प्रवृत्तौ सत्यां मीमांसकमत-

परित्यागप्रयुक्तोपहासो वृत्तौ वर्णितो मृगेन्द्रसंहितायां ॥ ये तु देवतोपासकास्तैरपि विग्रहादि पञ्चकापह्नवाभिप्रायरहस्यं जानानैरपि कर्मप्राधान्यवादो न निरसनीयः । तथात्वे तादृशकर्मठानां चित्तपरिपाकविशेषमन्तरेण समर्थ्यमानार्थे विश्वासानुदयात् निरसनयुक्तिभिस्तदवलम्बितार्थे सन्देहोदये तेषामुभयभ्रष्टतापत्तेः । अत एव तेषां संरक्षणार्थमेवोपासकैरपि तानि कर्माणि तद्वदेव सविश्वासमिव कार्याण्येव ॥ एतदभिप्रायेणैव लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ॥ इत्यादि विधयः ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनां इत्यादि निषेधाश्च ॥ उत्तरभूमिकाधिरूढैरपि पूर्वभूमिकायास्समर्थनं स्वभूमिकाया अप्रकाशनञ्चावश्यं कार्यमिति तु पिण्डितोर्थः ॥ तेनैतौ विधिनिषेधौ निस्त्रैगुण्ये पथि विचरतां जीवन्मुक्तानामप्यावश्यकाविति सिध्यति ॥ येषान्तु बहुजन्मसु पूर्वकाण्डोक्तकर्मानुष्ठानवशाच्चित्तपरिपाकविशेषो दृढो दृश्यते तादृशान्प्रति तु सम्यक् परीक्ष्य स्वभूमिका शनैश्शनैः प्रकाशनीयैव ॥ अन्यथा सम्प्रदायविच्छेदापत्तेः । त्रिपुरसुन्दर्युपास्तिपर्यन्ता ये भूमिकाभेदास्ते तु सविस्तारं वामकेश्वरतन्त्रव्याख्याने सेतुबन्धाख्याने अस्माभिः प्रदर्शिताः ॥ उपासनाशास्त्रे तु देवताप्राधान्यमेव न कर्मणः प्राधान्यम् ॥ क्रियाप्राधान्याभावादेव देवतारूप—सिद्धवस्तुबोधका वेदान्ता इति वाचो युक्तिः । देवतायाश्च त्रीणि रूपाणि स्थूलं सूक्ष्मं परञ्चेति-तत्राद्यं तत्तद्ध्यानश्लोकोक्तं-द्वितीयं तत्तन्मूलमन्त्रात्मकं तृतीयन्तु वासनात्मकम् ॥ देवतारूपत्रैविध्यादेव तदुपास्तिरपि त्रिविधा । बहिर्याग जपान्तर्यागभेदात् ॥ तदिदं सपरिकरमृग्वेदपुरुषो महोपनिषद्रूपेणोपदिशति तिस्रः पुरः इत्यादिना इत्युपनिषदित्यन्तेन ॥

अस्या उपनिषदः परदेवतास्तुतौ विनियोगः तृतीयदशमर्चमन्त्रलिंगात् ॥

**तिस्रः पुरस्त्रिपथा विश्वचर्षणी यत्राकथा अक्षरा सन्निविष्टा ॥
अधिष्ठायैनामजरापुराणी महत्तरा महिमा देवतानाम् ॥**

तत्रप्रधानदेवतां निर्देष्टुं प्रथमामृचमाह तिस्रः पुरइत्यादि ॥

तत्र मुक्तिस्तावत्पञ्चविधा-सालोक्यमेकं सामीप्यसारूप्यसायुज्यत्रितयं कैवल्यञ्चेति तास्वाद्यान्त्यौ प्रत्येकं द्वौ मार्गौ-मध्यमत्रयमेकोमार्गः। तथाच तैत्तिरीया आमनन्ति-य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यँस्सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम् ॥ इतिः अयं भावः । ऊर्ध्वरेतसां स्वाश्रमोक्तकर्मानुष्ठानवतां चन्द्रलोकप्राप्तिस्सालोक्यरूपा प्रतीकोपासनया स्वस्वाभिभावेनोपासनया अहं ग्रहोपासनया च सामीप्यादि त्रितयरूपा आदित्यलोकप्राप्तिः ॥ निर्गुणोपास्तिरूपब्रह्मज्ञानवतान्तु कैवल्यरूपब्रह्मपदप्राप्तिरिति ॥ एतन्मार्गत्रितयमेव स्पष्टमुपबृंहितं विष्णुपुराणे तृतीयांशे ॥ उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं-पितृयाणस्सवै पन्था वैश्वानरपथाद्बहिरित्यादिना विवेकज्ञानदृष्टं च तद्विष्णोः परमं पदं इत्यन्तेन मार्गत्रैविध्यादेव गन्तव्याः पुर्योपि तिस्रः ईदृशपुरत्रयप्रापकत्वात् तद्रूपत्वाद्वापरदेवता त्रिपुरेत्युच्यते ॥ आत्मबुध्या प्रतीकेन मातृबुध्याप्यहन्धिया कर्मणापि भजन्मर्त्यः कैवल्यं पदमश्नुते ॥ इति शाक्तिरहस्यवचनेन पञ्चविधात्मभजनेनापि त्रैपुरप्राप्तेरुक्तत्वात् ॥ तस्मात्

सैव तिस्रः पुरः त्रिपुरा। त्रयः पन्थानो यस्या स्सा त्रिपथा । तत्पुरुषानं गीकारादेव पथस्संख्याव्ययादेरिति नपुंसकत्वं न । चर्षणीशब्दो वैदिक निघण्टुरीत्या प्रजावाचकः। विश्वास्समस्ताश्चर्षणयो यस्यां सा विश्वचर्षणीदेव्येत्रसमस्तप्राण्युत्पादिकेति यावत् ॥ विश्वदृष्टिर्वा इदमत्र बोध्यं ॥ तदैक्षत बहुस्यां प्रजायेयेति श्रुतिसिद्धं यद्ब्रह्मणः प्राथमिकमीक्षणं तदेव सर्वजनकं, तदेवेच्छारूपं, कृतिरूपञ्च ॥ सोकामयत तपोकुरुत इति श्रुत्यन्तरात् । स्वाभाविकी ज्ञानबलक्रिया चेति श्रुत्यापि एवैव ब्रह्माभिन्ना प्राथमिकी वृत्तिः ज्ञानेच्छाकृतिरूपेति प्रतिपाद्यते ॥ सा वृत्तिरेवेच्छाज्ञानक्रियासमष्टिरूपत्वात् शान्तेत्युच्यते ॥ पश्यन्ती मध्यमावैखरीत्रयसमष्टिसूक्ष्मरूपत्वात्परेत्युच्यते । वामाज्येष्ठारौद्रीसमष्टिरूपत्वादम्बिकेत्युच्यते ॥ सा शान्तात्मिका देवतैव श्रीचक्रस्थं बिन्दुचक्रं ॥ तदुक्तं नित्याहृदये परंब्रह्म प्रक्रम्य ॥

प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकं ।
बैन्दवं चक्रमित्यादि ॥

तदेव च तिस्रः पुरः त्रिपथा विश्वचर्षणी इति विशेषणत्रयनिर्दिष्टं ॥ विशेषणेषु बहुवचनैकवचनाभ्यां विशेष्यस्य त्रित्रिरूपत्वमेकात्मकत्वञ्च सूचितं ॥ तादृशमीक्षणावच्छिन्नं ब्रह्म प्रक्रम्य कालिकापुराणेप्युक्तं ॥

त्रिकोणमण्डलञ्चास्या भूपुरं च त्रिरेखकं ।
मन्त्रोपि त्र्यक्षरः प्रोक्तः तथा रूपत्रयं पुनः ।
त्रिविधा कुण्डली शक्तिः त्रिदेवानां च सृष्टये
सर्वंत्रयं त्रयं यस्मात्तस्मात्तु त्रिपुरा मता। इत्यादि ॥

अर्थसृष्टिजनकत्वेन तां निर्दिश्य शब्दसृष्टिजनकत्वेनापि तां निर्दिशति यत्रेति । यत्र यस्यां शान्ताम्बिकादिरूपायां त्रिपुरायां अकथाः अकाराद्याः ककाराद्याः थकाराद्याः षोडशषोडश अक्षरा संनिविष्टा-अक्षराणि सन्निविष्टानि वटबीजे वृक्षवत् सम्यक् नितरां च वर्तन्ते । हकारो हि विमर्शस्वरूप एवेति न व्यष्टित्वेन पृथक् गृह्यते हकारार्णः कलारूपो विमर्शाख्यः प्रकीर्तितः। इति वचनात् । ळकारस्तु लकारान्नभिद्यते ॥ क्षकारस्तु कषसंसर्गरूप एव न स्वतन्त्रः । तस्मादष्टाचत्वारिंशन्मातृकाः ॥ एता एव मातृकाः । तथाच सूतसंहितायां

एकधा च द्विधा चैव तथा षोडशधा स्थिता ।
द्वात्रिंशद्भेदसंभिन्ना या तां वन्दे परां कलां ॥ इति ॥

द्विधा स्वरव्यञ्जनभेदेन स्वरः षोडशरूपः । व्यञ्जनं द्वात्रिंशद्भेदमित्यर्थः॥ अक्षरादिपदद्वये जसोडादेशश्छान्दसः ॥ एवं पूर्वार्धेन बिन्दुचक्रस्वरूप-मुपदिश्य तदधिष्ठात्रीं उपास्यां परदेवतामाहाधिष्ठायेति ॥ एनां साम्प्रतमुपदिष्टां बिन्दुरूपां त्रिपुरामधिष्ठाय काचित् अस्ति देवता ॥ अस्ति र्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोप्यस्ति इति कात्यायनवचनादस्तेरध्याहारः ॥ उत्तरमन्त्रस्थक्रियया वा ल्यपोन्वयः ॥ सा देवता अजरा मरणरहिता जॄवयोहानावित्यत्र वयोहानिपदेन वयस्यो नाशस्यैव कथनात् ॥ पुराणी-अनादिः । जन्मरहिता देवतानां ब्रह्मविष्णु-शिवादीनामतिप्रसिद्धानां मध्ये महत्तरा सर्वोत्कृष्टा । तासां देवतानां यो महिमा तद्रूपा च । देवतान्तराणां माहात्म्यस्याप्येषैव निदानं एतदुपासनयैव तेषां महिमलाभ इति भावः ॥ त्रिपुरोपनिषदि

तदनुयायिपुराणतन्त्रादिषु च शिवविष्ण्वाद्युपासितानां विद्यानां बहुशः प्रदर्शनात् "शंभुः पूजयते देवीं मन्त्रशक्तिमयीं शुभां" ॥ इत्यादिना निखिलदेवपूजनीयप्रतिमाभेदानां पद्मपुराणे विस्तरेण कथनाच्च । तथा च "न भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके" इति न्यायेन देवतान्तरोपास्यपेक्षया परदेवतोपास्तिरेव ज्यायसी इति तु ध्वन्योर्थः ॥ तदिदमस्माभिरुक्तं परशिवस्तवे ॥

त्वद्दत्तैश्वर्यभाजः परशिवकथंकारमन्यान् सुरेन्द्रान्
याचेदेहीति शक्रद्रुहिणहरिमुखान् भिक्षुकान् भिक्षुकोऽहं ।
अज्ञोपि द्वादशाहक्रतुविकृतिशतस्यांगभूतोपि चोक्थ्यो
ज्योतिष्टोमोक्थ्यधर्मानभिलषति न तु द्वादशाहोक्थ्यधर्मान्

इति ॥ अजेत्यादिभिर्ब्रह्मलिंगैर्बिन्दुचक्राधिष्ठात्रीदेवता परंब्रह्मेव इत्युक्तं भवति । देवतापदस्य विशेष्यत्वाभिप्रायेण स्त्रीत्वं अजरादिपदानां अतएव श्रुत्यन्तरे क्लीबनिर्देशः ॥ तथा च स्पष्टमेवाथर्वणा आमनन्ति ।

अष्टाचक्रानवद्वारा देवानां पूरयोध्या तस्यां हिरण्मयः कोशः
स्वर्गो लोको ज्योतिषावृतः तस्मिन् हिरण्मये कोशे त्र्यरे
त्रिप्रतिष्ठितं तस्मिन् यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदोविदुः ॥

भूपुरादित्रिकोणान्तचक्राष्टकोपरि यः कोशो गर्भीकृतरूपत्रयोबिन्दुरिति यावत् ॥ तस्मिन् यक्षं महद्भूतमस्ति । बहिःपूजाऽयोग्यत्वाद्यक्षपदेन निर्देशः । तद् स्वात्मनि ब्रह्मविद एव विदुः । नान्ये इत्यर्थः इति सेतुबन्धे विस्तरः ॥

एवं बिन्दुचक्रमुक्त्वा त्रिकोणवसुकोणचक्रद्वयसमष्टिरूपं नवयोन्यात्मकं चक्रमुपदेष्टुं द्वितीयामृचमाह ॥ नवयोनीरिति

(2) नवयोनीर्नवचक्राणि दधिरे नवैवयोगा नवयोगिनीश्च ॥ नवानां चक्रे अधिनाथास्योना नवमुद्रानवभद्रा महीनां ॥

तिस्रः पुरो नवयोनीर्दधिरे एकत्रापि बिन्दुचक्रं त्र्यात्मकत्वात् प्रत्येकं रूपत्रयं दध्रे इति दीधीङ् दीप्तिदेवनयोरिति च्छान्दसधातोरिदं रूपं । दीपनं च प्रकाशनं (मेव) फलत उत्पादनमेवेह विवक्षितोर्थः ॥ शान्तात्वावच्छेदेनेच्छाशक्तिः क्रियाशक्तिः ज्ञानशक्तिः चेति तिस्रो देवता उदपादयत् अम्बिकात्वावच्छेदेन ब्रह्मविष्णुरुद्रान् स्त्रीरूपान् वामाज्येष्ठारौद्रीशक्तिनामकानजनयत् । परात्वावच्छेदेन पश्यन्तीमध्यमावैखरीति वाग्देवता अजीजनत् इत्यर्थः । सा परेदवतैवेनां त्रिपुरामधिष्ठाय नवयोनीश्चक्रे इति वान्वयः ॥ एता नवदेवता एव नवयोनिचक्रात्मना परिणता इति तु वासनाध्वनिः ॥ किञ्च त्रैलोक्यमोहनादीनि नवचक्राणि जातजनिष्यमाणानि संस्कारात्मना नवयोनिष्वेव सन्ति । तदेतदाह नवचक्राणि कर्तृणि नवयोनीर्दधिरे इति शक्तित्रिकोणद्वयेन वह्नित्रिकोणेनैकेन च नवयोनिचक्रनिष्पत्तिः । प्रतित्रिकोणं तिस्रो रेखा इति नवानां रेखाणां योगा अपि कोणरूपा नवैव ॥ तेन नवयोगिनीर्दधिरे । नवचक्राणामिह सत्वादेव तत्रत्य प्रकटादियोगिनीनवकमपि कोणात्मनेहैव तिष्ठतीति भावः ॥ देशकालानवच्छिन्नं तदूर्ध्वं परमं महः । इत्यादि

व्यवहारात् देशाद्यवच्छिन्नो बिन्दुचक्रादिप्रपञ्चो ब्रह्मणोऽधोधस्तिष्ठतीति लभ्यते। एतन्मूलक एव श्रीचक्रस्य मेरुप्रस्तारोपि । तेनैकस्मिंश्चक्रे भूपुरादिबिन्द्वन्ता उपर्युपरि नवभूमिकाः तासामधिपतयोपि त्रिपुराचक्रेश्वर्यादिनामानो नवैव। ता अपि नवयोनिष्वेव सूक्ष्मरूपेण तिष्ठन्तीत्याह-चक्रे नवानां महीनामधिनाथा अपि कर्त्र्यो नवयोनीर्दधिरे इति ॥ स्योना इति चक्रेश्वरीविशेषणं। सुखहेतुभूता इत्यर्थः । नवमुद्राः संक्षोभिण्यादि योन्यन्ता अपि इहैव स्थिताः। नवभद्रास्तु तन्त्रे विवृताः "धर्माधर्मौ तथात्मानो मातृमेये तथा प्रमा" । इति । पुण्यं पापं-आत्मा अन्तरात्मा परमात्मा ज्ञानात्मा प्रमाता प्रमेयं प्रमेति नवकं तदर्थः आत्मचतुष्टयस्वरूपविवरणमात्मोपनिषदि द्रष्टव्यं ॥ चक्रं नवात्मकमिदं नवधा भिन्नमन्त्रकं । इत्युपबृंहणदर्शनात् । भद्रापदेन मन्त्रा वा ग्राह्याः ॥ ते च नवचक्रेश्वरीमन्त्रा इति केचित् । सान्निध्यान्मुद्रामन्त्रा एवेति तु युक्तं। बिन्दुत्रिकोणवसुकोणात्मकचक्रत्रयरूपे संहारचक्र एव सर्वं श्रीचक्रं सूक्ष्मरूपेण तिष्ठतीति तु पिण्डितोर्थः । आपत्कालिकसंक्षिप्तपूजाप्रकारेषु वसुकोणादिबिन्द्वन्तमातृपूजाविधिर्यस्तन्त्रेषूपलभ्यते । तत्रेयमेव श्रुतिर्मूलं ॥ अत्रसर्वत्रोपब्रह्मणानि तन्त्रपुराणवचनानि तु विस्तरभयान्नलिख्यन्ते ॥

अथ दशारद्वयमन्वश्ररूपं स्थितिचक्रमुपदेष्टुं तृतीयामृचमाह

(३) एका सा आसीत् प्रथमासा नवासीत्. आसोनविंशत् आसोनत्रिंशत्। चत्वारिंशदथतिस्रस्सामिधा उशतीरिव मातरोमाविशन्तु ॥

एकासासीदिति आभ्यो नवयोनिभ्यस्सूक्ष्म भूतानि पञ्च, स्थूल-

भूतानि पञ्चेति भूतदशकमभूत् । तेभ्यः स्थूलसूक्ष्मभेदेन शब्दादितन्मात्रदशकमभूत् तेभ्यश्च कर्मेन्द्रियाणि पञ्च, ज्ञानेन्द्रियाणि पञ्च, अन्तःकरणानि चत्वारि, इति चतुर्दशकमजायत ॥ एतास्सर्वा अपि देवताः स्त्रीरूपत्वात् योनिरूपा एव । तदिदं सर्वं "भूततन्मात्रदशकं प्रकाशालम्बनत्वतः । द्विदशारस्फुरद्रूपं" इत्यादिना तन्त्रे विवृतं । सैव प्रक्रिया पूर्वानुवादपूर्वकमिहोपदिश्यते । या प्रथमा सर्वजगत्कारणभूता सा एकैव पूर्वमासीत् बिन्दुचक्ररूपा । अथ नवासीत् नवयोन्यात्मना। अथोनविंशत् एकोनविंशतिस्वरूपा आस । नवयोनयोऽन्तर्दशारयोनयश्चेति । विंशदित्यादि छान्दसं । अथोनत्रिंशदास बहिर्दशारयोनीनां मेळनेन । अथ चत्वारिंशत्तिस्रश्च पूर्वासु च चतुर्दशमेळनेन त्रिचत्वारिंशद्योनिस्वरूपैकैव देवी जातेत्यर्थः बिन्दुचक्रस्यान्तराकारत्वेन एकासासीदित्यस्य योन्याकृतीनां मध्ये अपरिगणनम् । समिधा समिद्धा देदीप्यमाना एतामातरोमाविशन्तु मां प्रविशन्तु । मच्छरीरस्यापि श्रीचक्ररूपत्वादिति स्तोत्रकृतः प्रार्थनम् ॥ उशतीरिव-कामयमाना इव-वस्तुतो निष्कामत्वात् धेनवोपि वत्ससामीप्यमिच्छन्त्यः वनात् द्रुतं यथागोष्ठं प्रविशन्ति तथा एताः प्रविशन्त्वित्यर्थः । इयमेव श्रुतिः चक्रन्यासविधीनां तन्त्रस्थानां मूलं । एतासामेव देवतानां स्वशरीरे न्यस्तव्यत्वात् । 'योगिन्यो यास्तु तास्सर्वा गेहं कुर्वन्तु मे वपुः" इति शक्तिन्यासमन्त्रलिंगसंवादात्तस्यापि मूलं ॥

अथ सृष्टिचक्रे अवशिष्टे वृत्तत्रयविशिष्ट पद्मद्वयमुपदेष्टुं चतुर्थीमृचमाह ऊर्ध्वज्वलदिति

4) ऊर्ध्वज्वलज्ज्वलनज्योतिरग्रेतमो वैतिरश्चीनमजरंतद्रजो भूत्। आनन्दनं मोदनं ज्योतिरिन्दोः एताउवै मण्डला-मण्डयन्ति ॥

चतुर्दशारमधोधोहिपद्मे अष्टदळषोडशदळात्मके वर्तते ॥ तथोर्ध्व कर्णिकावृत्तबाह्यवृत्तमेकमेव। त्रीणि वृत्तानीति कतिपयसिद्धान्तः ॥ अत एव "ज्येष्ठारूपं चतुष्कोणं बामारूपं भ्रमित्रयं" ॥ इत्यत्र भ्रमित्रयपदस्य वृत्तत्रयान्तरालद्वयवर्त्तिपद्मद्वयलक्षकत्वेन प्राचामाचार्याणां व्याख्या युज्यते ॥ वृत्तत्रितयसंयुतं सरोरुहद्वयं शाक्तैरग्नीषोमात्मकं प्रिये। इति वचनेप्यैषेव व्याख्या ॥ तानि च वृत्तानि अग्निसोमसूर्यगुणत्रयरूपाणि इति प्रकृतायामृचिवर्णनेनैव तदन्तराल-पद्मद्वयं वर्णितं वेदितव्यं ॥ अक्षरार्थस्तु अग्रे स्थितिचक्रोत्तरचक्रेषु। प्रथमं तमो वै निश्चिततमोगुणात्मकं ज्वलननामकं ज्योतिर्मण्डलमभूत्। ऊर्ध्वज्वलदितिविशेषणेनाग्निज्वालारूपदृढीकारः ॥ ऊर्ध्वभागे कज्जल-दर्शनेन तमोरूपत्वदृढीकारश्च अत एव तेजोमयस्य तमस्त्वोक्तावसांगत्यशंकापरिहारायैव वै इत्यव्ययं। ततः परं तिरश्चीनं तिर्यक् प्रसारिज्योतिर्मण्डलं रक्तत्वाद्रजोगुणमभूत्। तच्च सूर्यरूपं अग्निसूर्ययोरूर्ध्वतिर्यक्प्रसृतेः प्रत्यक्षत्वात्। यदाहुरभियुक्ताः ।

गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ॥ इति

अजरमिति विशेषणमग्नितो वैलक्षण्यदृढीकाराय । ततो मोदनं वैषयिकसुखोत्पादकं । इन्दोः ज्योतिर्मण्डलमभूत् । आनन्दपदेन सत्त्वगुणात्मकतोक्ता । सत्वाधिवयस्यैव ब्रह्मानन्दा-

भिव्यञ्जकत्वात् । उ. वै. इति कोमलामन्त्रणे । वै एवकारार्थे वा । एवं त्रीणिमण्डलानि वृत्तानि । एता मातृः मण्डयन्ति शोभावतीः कुर्वते । वृत्तत्रयान्तरालवर्तिकमलयुगलविशिष्टं श्रीचक्रं कार्यक्षमं न केवलं मन्वश्रान्तमित्यर्थः । मन्वश्रादिबिन्द्वन्तपूजाया आपत्कालिकत्वादिति भावः ॥

नवमं भूगृहात्मकं चक्रमुपदेष्टुं पञ्चमीमृचमाह तिस्रश्चरेखा इति ॥

(5) तिस्रश्च रेखास्सदनानि भूमेः त्रिविष्टपा स्त्रिगुणास्त्रिप्रकाशाः ॥ एतत्पुरं पूरकं पूरकाणामत्र प्रथेते मदनो मदन्या ॥

तन्त्रान्तरेषु कर्णिकावृत्तद्वयातिरिक्तानि पद्मद्वयाद्बहिः त्रीणि वृत्तानि विहितानि दृश्यन्ते । तत्पक्षे तिस्रश्च रेखा इत्येतावन्मात्रं वृत्तरेखात्रयपरं नेयं । न चैवं सति कर्णिकाद्वयस्यैवावशेषेण मण्डलत्रयकथनासंगतिरिति वाच्यं । तन्त्रराजे मन्वश्राद्बहिर्मर्यादावृत्तस्याष्टदलवृत्तातिरिक्तस्य कथनेनास्याः श्रुतेस्तन्मूलत्वस्योपपत्तेः ॥ भूमेस्सदनानि रेखास्तिस्र इति सामानाधिकरण्यं अक्लिष्टोऽर्थः ॥ ता एव त्रिविष्टपा भुवनत्रयरूपाः । देवतावासभूमित्वात् स्वर्गरूपा वा । त्रिगुणाः गुणत्रयरूपाः, त्रिप्रकाशाः सूर्यचन्द्राग्निरूपवृत्तत्रयप्रकाशरूपाः ॥ श्रीचक्रवर्णनमुपसंहरति एतदिति । सार्धचतुष्टयेन वर्णितं पुरं श्रीपुरमिव सपरिवारपरदेवतावासस्थानं चक्रं । पूरकाणां भक्तमनोरथपरिपूरकाणां शिवविष्ण्वादीनामपि पूरकं । मनोरथपरिपूरकं अत्र श्रीचक्रे मदनः शिवकामेश्वरः, मदन्या शिवकामसुन्दरी च प्रथेते स्वमयूखात्मकाणिमादिनानारूपविस्तारेण

विलसत इत्यर्थः ॥ मदनी आ इति छेदो वा पुंयोगलक्षणो ङीष् ॥ आप्रथते इत्यन्वयः । छन्दसि परेपि, व्यवहिताश्च, इत्यभ्यनुज्ञानात् ॥ क्षेत्रेषु विविधेषु नामभेदेन यानि देवीरूपाणि पुराणेषु तन्त्रेषु चोपलभ्यन्ते तानि सर्वाणि अस्या एवेत्युपदेष्टुं षष्ठीमृचमाह ॥

(6) मदन्तिका मानिनी मंगला च सुभगा च सा सुन्दरी शुद्धिमत्ता । लज्जामतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ती ॥

मदन्तिकेति। पद्मपुराणे देवीतीर्थपरिगणनावसरे कतिपयानि रूपाण्युक्तानि प्रयागे ललितादेवीत्यादि ।

लंकायां मंगला नाम त्रिकूटे भद्रसुन्दरी ।
करवीरेमहालक्ष्मीरुमादेवी विनायके ॥
देवदारुवने पुष्टिर्मेधाकाश्मीरमण्डले ।
तुष्टिर्वत्सेश्वरे तथा इत्यादीनि अन्यान्यपि रूपाणि तत्र तत्रान्वेष्याणि ॥

मदन्तिकेत्यादि चतुर्दशकं, वाराणस्यां विशालाक्षीत्यादीनामुपलक्षणं । यदेव किंचिद्देवीरूपं तेन लाल्प्यमानापि सैवेत्यर्थः ॥ लालपन्तीपदं लाल्प्यमानापरं ॥ प्रातिपदिकादुच्चरन्ती विभक्तिः प्रातिपदिकार्थे विशेषक इत्याहेति शाबरभाष्ये प्रयोगदर्शनात् । अथवा पञ्चदशाक्षराणां पञ्चदशेमादेवताः ॥ शुद्धिमत्तेत्यत्र सिद्धिमित्याथर्वणपाठः ॥

एवं वर्णिताया देवताया उपास्ति विधातुं सप्तमीमृचमाह इमां विज्ञायेत्यादि ॥

(7) इमां विज्ञाय सुधया मदन्ति परिस्रुता तर्पयन्तः स्वपीठम् । नाकस्य पृष्ठे महतो वसन्ति परं धाम त्रैपुरं चाविशन्ति ॥

इमां पूर्वोक्तां परदेवतां विज्ञाय, विधिविशेषपूर्वकं ज्ञात्वा गुरूपसदनदीक्षादिपूर्वकमुपास्तिं गृहीत्वा-स्वीकृत्य, स्वपीठं-स्वशरीराभिन्न श्रीचक्रं, तत्र देवतां सावरणां सुधया परिस्रुता-पीयूषीकृतेन द्रव्येण, तर्पयन्तः- तर्पणाद्युपचारैः पूजयन्तो, ये मदन्ति-विषयभानप्रमोषपूर्वक स्वात्मैकविषयकनिर्विकल्पकवृत्तिभाजो भवन्ति । ते महतो नाकस्य पृष्ठे वसन्ति, त्रैपुरं परं धाम आविशन्ति चेत्यर्थः । अमृतीकरणं संस्कारान्तराणामुपलक्षणं तदभिमानिदेवतायास्सुधादेवीति संविच्च संस्कारमन्त्रवर्णादवगम्यते "मन्त्रसंस्कारसंशुद्धं देवतामृतमुच्यते" ॥ इति रुद्रयामले च महानाकपृष्ठवासः त्रिविधपुरुषार्थफलोपलक्षकः । त्रिपुरायाः परं धाम तु मुक्तोपसृप्यं स्वरूपं, तेन मोक्ष उच्यते, सर्वान्कामान्मोक्षं चाप्नुवन्तीति भावः ॥ एवं सर्वगताशक्तिस्सा ब्रह्मेति विविच्यते ।

सगुणा निर्गुणा चेति द्विविधोक्ता मनीषिभिः ।
सगुणारागिभिस्सेव्या निर्गुणा तु विरागिभिः ॥
धर्मार्थकाममोक्षाणां स्वामिनी सा निराकुला ।
ददाति वाञ्छितानर्थानर्चिता विधिपूर्वकं ॥

इति देवी भागवतेऽपि स्मरणात् । श्रीविद्यादीक्षितो द्रव्यवता स्वपीठार्चनेन निर्विकल्पकवृत्तिद्वारा सर्वान्कामान्भावयेदिति भावनाविशिष्टभावनान्तरविधिः पर्यवस्यति ॥ सर्वथा मतिमान् दीक्षेत इत्यादि कल्पसूत्रादिगतविशेषणविधीनामियमेव श्रुतिर्मूलं । विज्ञाय तर्पयन्त इत्यधिकारिविशेषणत्वेन श्रुतमपि तर्पणं फलभावनाकरणत्वेन संबध्यते "हिरण्यदा अमृतत्वं भजन्ते" इतिवदप्राप्तार्थकत्वाद्विधिशक्तिप्रतिबंन्धाभावाच्च मन्त्रत्वेऽपि न विधित्वव्याघातः । "वसन्ताय कपिञ्जलानालभेत-प्रणीयादीन्नाथमाना यतव्यान् । आस्यजानन्तो नामचिद्विवक्तन" इत्यादि मन्त्राणामपि बहुशो विधित्वस्वीकारात्, वस्तुतो मदन्तीत्यस्य यदाग्नेयवाक्य इव लेट्त्वकल्पनया भावार्थाधिकरणन्यायेन चिद्व्यभिन्नस्वात्ममात्रविषयकवृत्तिविशेषवाचकमदधात्वर्थस्यैव करणत्वं ॥ अन्तर्यागपदवाच्यतापि तस्यैव, यजतेः वृत्तिविशेषवाचकत्वात् परिस्रुतेति तु मत्वर्थलक्षणया धात्वर्थेनान्वेति भावनान्वितयोरुभयोररुणैकहायनीन्यायेन वा पार्ष्ठिकान्वयः । प्रतितिष्ठन्तीत्यस्येव नाकस्य पृष्ठ इत्यादेर्भाव्यसमर्पकत्वं, चकारेण फलसमुच्चयकथनात्, "पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति" इत्यत्रेव संवलिताधिकारत्वं, अनेकेषां पुरुषार्थानां व्यासज्यवृत्तिफलत्वं इति यावत् ॥ न पुनस्सर्वेभ्यः कामेभ्य इत्यत्रेव प्रत्येकपर्याप्तं तर्पणन्तु फलवदफलन्यायेनांगं । इमां विज्ञायेति तु विद्वत्ताधिकारितावच्छेदको धर्मः । अतएव

कुलदीक्षाविहीनानां नाधिकारो द्विजन्मनां

इति समयाचारस्मृतिरुपपद्यते ॥ इह तर्पयन्त इति बहिर्यागविधौ

वक्ष्यमाणे निवेदयन् स्वात्मीकृत्येति विधौ च शतृ ल्यप् प्रत्ययाभ्यां देवतानिवेदनस्वात्मीकरणयोस्समानकालिकत्वकथनात् दिव्यपानविधावेव श्रुतिस्वारस्यं, न वीरपानविधौ, तेन

पानन्तु त्रिविधं प्रोक्तं दिव्यवीर पशुक्रमैः।
दिव्यं देव्यग्रतः पानं वीरमुद्रासने कृतम् ॥

इति स्मृतेर्मूलश्रुत्यन्तरमन्वेष्यं। पुरुषार्थनिषेधास्तु रागप्राप्तकविषयकत्वात् क्रत्वर्थत्वेन विहितेषु न प्रवर्तन्त एव ॥

येन केनाप्युपायेन शिवे चित्तं निवेशयेत्।
तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥

इत्यादिपौराणवचसां ईदृशाशय एव स्वारस्यात् स्पष्टानां तत्र वचसां क्रत्वर्थतया सर्ववर्णोद्देशेन विधायकानां बहुलमुपलंभात्, तेषाञ्चेदृशानेकप्रत्यक्षश्रुतिमूलकत्वेन बलाबलचिन्तानवकाशादिति दिक् ॥
एवं पररूपोपास्तिं विधाय सूक्ष्मरूपोपास्तिविधित्सया अष्टमीमृचमाह।

(8) कामो योनिः कमलावज्रपाणिर्गुहाहसामातरिश्वाभ्रमिन्द्रः। पुनर्गुहासकलामायया च पुरूच्येषा विश्वमाताऽदिविद्या ॥

कामोयोनिरिति ॥ इह पञ्चदशाक्षरो मन्त्र उद्ध्रियते स च स्त्रीदेवत्यत्वाच्चिद्रूपत्वाच्च विद्यापदेनोच्यते ॥ तादृश्यपि वेदमाता गायत्री कण्ठरवेण पठ्यते। अस्य तु प्रत्यक्षरं तद्वाचकपदमन्तरेण कतिपयानां

निर्देशादतिरहस्यत्वं मन्त्रस्य, तद्द्वारा तदधिकारिककर्मणां च तथात्वं ध्वनितं ॥ किं बहुना गायत्र्यप्यादिविद्योद्धारिकैवेति त्रिपुरातापिन्या स्पष्टं प्रदर्श्यते, भागवतप्रथमश्लोकोपि एवमेवोपबृंहयति

सर्वचैतन्यरूपान्तामाद्यांविद्यां च धीमहि, बुद्धिं यानः प्रचोदयात् इति ॥ अतिरहस्यत्वादेवनाथचरणैकावगमनीयोयं मन्त्रः । मातरिश्वा-कामश्च चतुर्मुखवाच काक्षरं, कमलायोनीचतुर्थैकादशस्वरौ, इन्द्रवज्रराणी तृतीयमन्तस्थाक्षरं, गुहामाये भुवनेश्वरीबीजं, अभ्रं तस्या एवाद्यमक्षरं हकारः, शेषपञ्चकं स्वरूपं, एषा आदिविद्या पुरूची पुरातनी, विश्वमाता जगज्जनयित्री विद्याक्षरैर्जगदुत्पत्तेर्योगिनीहृदये सम्प्रदायार्थप्रकरणे सविस्तरं वर्णनात्, मन्त्रार्थस्तु दत्तात्रेयागस्त्यादिभिर्बहुभिस्तन्त्रभेदेन बहुधोक्तः । स चास्माभिर्वरिवस्यारहस्ये यथामति संगृह्य दर्शित इति ततएवावगन्तव्यम् ॥ कामराजोपासितां विद्यामुपदिश्य लोपामुद्रोपासितां विद्यामुपदेष्टुं नवमीमृचमाह षष्ठसप्तममिति ॥

(९) षष्ठंसप्तममथवह्निसारथिमस्यामूलत्रिकमादेशयन्तः । कथ्यं कविं कल्पकं काममीशं तुष्टुवांसोऽमृतत्वं भजन्ते ॥

अस्या एव विद्याया मूलत्रिकं प्राथमिकमक्षरत्रयमुन्मूल्येति शेषः तत्स्थानेपि षष्ठादिवर्णत्रयमेव निवेशयन्तो जापकाविद्याद्वयान्यतरेण ईशं शुद्धसत्त्वोपाधिकं परशिवं, तुष्टुवांसः स्तुवन्तः, जपन्तः अमृतत्वं भजन्ते विद्याजपेन मोक्षं भावयेदित्यर्थः ईशं विशिनष्टिकामं, सो कामयत

बहुस्यां प्रजायेयेति श्रुतिप्रतिपाद्यत्वेनेक्षत्यधिकरणे निर्णीतं, कल्पकं जगत्कल्पनाधिष्ठानं जन्माद्यधिकरणोक्तं कर्त्रिं वेदप्रणेतारं, कथ्यं, वेदवेद्यं, शास्त्रयोनित्वाधिकरणे वर्णकद्वयेनोक्तं, परं ब्रह्मैवेति तु विशेषणसमर्पितोर्थः । अजरापुराणीत्यादिभिर्ब्रह्मलिंगैः इह पुंलिंगैः वक्ष्यमाणकामकलाध्यानगतस्त्रीलिंगैश्च परदेवतायास्त्रिविधं ध्यानं विहितं भवति, तथाचोपबृंहितं कुलार्णवे

पुंरूपं वा स्मरेद्देवीं स्त्रीरूपं वा विचिन्तयेत् ।
अथवा निष्कलं ध्यायेत्सच्चिदानन्दलक्षणं इति ॥

यद्यपि परोपास्तौ निष्कलं, जपे पुंरूपं, बहिर्यागे स्त्रीरूपं, ध्येयमिति व्यवस्थापि सुवचा, तथापि स्त्रीपुंसयोः समप्राधान्यस्य वक्ष्यमाणत्वात् सम्प्रदायाच्चैच्छिक एव विकल्पः ॥ [1]मनुचन्द्राद्युपासितविद्यानां अन्यासामपि त्रिपुरातापिन्यामुद्धारदर्शनेपि प्रकृते द्वयोरेवोद्धारः तास्वेनयोराधिक्यध्वननार्थः । अत एव ज्ञानार्णवे द्वादशविधविद्या उद्धृत्य ।

विद्याद्वयमिदं भद्रे देवानामपि दुर्लभम् ॥

इत्यादिनोपबृंहितं ॥ अनयोरपि मध्येकादिविद्याया एव

---

1. टिप्पणी :– मनुं चन्द्रं कुबेरं च लोपामुद्रां च मन्मथम् ।
अगस्त्यं नन्दिकेशं च सूर्यं विष्णुं च षण्मुखम् ॥
शिवं दुर्वाससं चैव क्रमेणान्ते समर्चयेत् ॥ इति
द्वादशोपासकानामनुक्रमणं दृश्यते ॥

प्रथममुद्धारादाधिक्यध्वनिः अतएव

श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथापरा ।

इति ब्रह्माण्डोपबृंहणं, वस्तुतस्सर्वासां विद्यानामभेदात् तारतम्योक्तिः प्रशंसामात्रमिति समर्थितं सेतुबन्धग्रन्थे अस्माभिः ॥ अतएव श्रीमदाचार्यभगवत्पादैः वैपरीत्येनानयोरुद्धारः प्रदर्शितः सौन्दर्यलहर्यां। तत्रापि प्रकृतश्रुत्यानुगुण्याय शिवशक्तिकामपदानां अन्यथा व्याख्यानं कतिपयानां क्लिष्टत्वान्निरर्थकत्वाच्च नादर्त्तव्यं ॥ अत्रान्तर्यागस्यैव प्रकरणित्वेन तदीयद्रव्यानुवादेन गुणान्तरसमुच्चयस्य द्वादश्यामृचि- विधास्यमानत्वेन प्रकरणानुवृत्तेर्वक्तव्यतया तन्मध्यपतितस्य जपस्य प्रकरण्यन्तर्यागांगत्वात् अमृतत्वं भजन्ते इति अपापश्लोकश्रवणवत् अर्थवादः ॥ मन्त्रेपि विधित्वस्येवार्थवादत्वस्यापि स्वीकारे बाधकाभावात् । तिस्रः पुर इत्यादेस्तु अन्तर्यागविधिशेषत्वेपि नार्थवादत्वं ॥ विधिशेषत्वस्यार्थवादत्वव्याप्यत्वे मानाभावात् अर्थवादत्वेपि वा भूतार्थ- वादत्वेन स्वार्थे प्रामाण्याच्च, न च द्वादश्यामृचि स्थूलोपास्तिर्भिन्नैव बहिर्यागरूपा विधीयत इति वाच्यं तथापि पञ्चदश्यामृचि मदधात्वर्थविवरणेनोपसंहारदर्शनात् प्रकरणानुवृत्तेर्दुर्वारत्वात् ॥ वस्तुत उपास्तित्रयस्य समप्राधान्यमेव, ॥ विधित्रयेपि फलश्रवणेनान्यतमस्य प्रकरणित्वकल्पने विनिगमनाविरहात् ॥ आग्नेयादिषट्कस्येव मिलितानामेव च फलजनकत्वं,

अन्तर्यागबहिर्यागौ गृहस्थस्सर्वदाऽचरेत् ।
चक्रराजार्चनं देव्या जपो नाम्नाञ्च कीर्तनं ॥

भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ॥

इत्यादि वचनात् ॥ अधिकारिविशेषेण केवलान्तर्यागजपयोः फलजनकत्वं तु वचनात् । असोमयाजिनोऽग्नीषोमीयपुरोडाशसाहित्याभावेपि फलसिद्धिवदित्यादिकं न्यायविद्भिरूह्यम् ॥ इतिनवमी ऋक् । अथस्थूलोपास्तिविधित्सयामूलदेवताया अन्तस्सगुणत्वेन चिन्तितायाः बहिश्चक्रे स्थापनाय स्थूलरूपविशेषं निर्देष्टुं दशमीमृचमाह ॥

(10) त्रिविष्टपं त्रिमुखं विश्वमातुर्नवरेखाऽस्वरमध्यं तदीळे ॥ बृहत्तिथीर्दशपञ्चादिनित्या सा षोडशीपुरमध्यं बिभर्ति ॥

त्रिविष्टपमिति ॥ रेखापदोत्तरं षोडशस्य विसर्गस्वरस्य प्रश्लेषः । नवरेखासु-नवयोनिघटिकासु, अः इति स्वरस्थानीयो मध्यो यस्य तत्, यद्वा नवसंख्यारेखा यस्य तत् नवरेखं संहारचक्रं तस्य अस्स्वरोपलक्षितं स्थानं मध्यं यस्यतत्, अः इत्याकार एव स्वरो यस्मिंस्तत् अःस्वरमिति वा विग्रहः तादृशं त्रिमुखं-त्रिकोणं, मध्यत्रिकोणमितियावत् तत् विश्वमातु-स्त्रिपुरसुन्दर्या स्त्रिविष्टपं-निवासस्थानं, पूजास्थानमितियावत् ॥ स्वर्गस्य देवतावासभूतत्वेन तद्वाचकपदेनात्र स्थाननिर्देशः ॥ तदीळे-इति स्तोतुर्वाक्यं द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते सडकारो ळकारः । इति प्रातिशाख्यविधितो डकारस्य ळकारः संजातः । इयमेवोपनिषदाथर्वणैरपि पठ्यते । तत्पक्षे न दुस्स्पृष्टादेशः इति

व्यवस्था । अस्स्वरस्य मध्यमत्वोक्त्यैव इतरेषां पञ्चदशस्वराणां रेखात्रये बिन्दुमभितः समंस्यादश्रुतत्वादिति न्यायेन पञ्च पञ्चधा विभज्यावस्थानं ध्वनितं ॥ तत्त्रिकोणं बृहत्, विभावितं सत् दशपञ्चतिथीः दशपञ्चतिथिदेवताः नित्याः कामेश्वर्यादिचित्रान्ताः बिभर्ति-दक्षिणोर्ध्वोत्तररेखासु स्वस्वस्थाने पञ्चपञ्चनित्याः पूजनीयाः इति भावः । तद्रूपबृंहितं ज्ञानार्णवे,

विभाव्य च महात्र्यस्रमग्रदक्षोत्तरक्रमात् ।
रेखासु विलिखेत्पश्चात् पञ्च पञ्चक्रमेणह ॥
अकाराद्यानुकारान्तान् दक्षिणायां विचिन्तयेत् ।
ततश्च पूर्वरेखायां दीर्घकर्णादिपञ्चकं ॥
विलिख्योत्तररेखायां शक्त्यादिविलिखेत्ततः ।
अनुस्वारान्तमध्ये च विसर्गं षोडशीं यजेत् ॥ इति ॥

चन्द्रस्य कलावृद्धिक्षयशालिन्यः पञ्चदश ता एव हि तिथयः

दर्शाद्याः पूर्णिमान्ताश्च कलाः पञ्चदशैवतु ॥

इत्यादिना तन्त्रे निर्दिष्टाः । दर्शादृष्टादर्शता इत्यादिना तैत्तिरीयैराम्नाताश्च । एतासां कारणभूता वृद्धिक्षयशून्या सादाख्या षोडशी कला ॥ सा च पञ्चदशानां नित्यानां कारणत्वादादिनित्येत्युच्यते । सा पूर्वं वर्णिता त्रिपुरसुन्दरी आदिनित्यास्वरूपासती पुरस्य श्रीचक्रस्य मध्यं, विसर्गस्वरस्थानं बिभर्ति-अध्यास्ते । प्रकाशविमर्शरूपाकारहकारव्यञ्जकत्वात् षोडशस्वरस्य तदात्मकताया युक्तत्वादिति द्रष्टव्यं ॥

प्रसंगात्काम्यं कामकलाध्यानं बहिर्यागाश्रितमुपदेष्टुं एकादशीमृचमाह ॥

(11) द्वामण्डला द्वास्तना बिम्बमेकं मुखं चाधरत्रीणि गुहासदनानि ॥ कामीं कलां काम्यरूपां विदित्वा नरो जायते कामरूपश्च काम्यः ॥

द्वामण्डलेति । द्वौ मण्डलौ द्वौ स्तनौ । एकं बिंब, मुखं । त्रीणि सदनानि-भूगृहाणि । गुहा-हकारार्धरूपा । यद्यपि बिंबोऽस्त्रीमण्डलं त्रिष्विति कोशेन बिंबपदस्यापि मण्डलवाचकत्वेन चतुर्थ्यामृचि वर्णितानां त्रयाणां मण्डलानामेवैष विभागः । तत्रापि वह्निसूर्यमण्डलावेव स्तनौ बिंबपद-स्वारस्यात्, पाटक्रमात् तदधस्तनमेव भूपुरं हकारार्धं इति स्पष्टं प्रतीयते। सन्तिव्यक्तं तान्यपि कामकलारूपाणि बहुविधानि तन्त्रेषु तत्र तत्र निर्दिष्टानि । तथापि भगवत्पादैः,

मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्यतदधो ।
हरार्धं ध्यायेत् इत्युपबृंहणात् ॥

अर्थक्रमेण पाठक्रमबाधात् बिम्बपदं बिन्दुपरं सत् बिन्द्वादिमन्वश्रान्तच-क्रगणपरं ॥

मण्डलत्रयरूपन्तु चक्रं शक्त्यनलात्मकं ॥

इति सुन्दरीश्लोके मण्डलपदस्य दशारादिचक्रपरत्वेनापि व्याख्यानदर्श-नात्, बिन्द्वादिमण्डलानां षण्णां एकात्रयवित्वेन विभावनाय एकमिति पदं ॥ द्वामण्डलेत्यष्टदळषोडशदळचक्रद्वयपरं, इति योज्यं । इदमवयवत्र-यकथनं सर्वावयवोपलक्षणं । वस्तुतश्शरीरेपि त्रय एवावयवाः शीर्षादिघ-ण्टिकान्तः, कण्ठादिस्तनान्तः, हृदयादि सीविन्यन्तश्च, केशपाणिपादन्तु

तत्तच्छाखा इति। एवं सर्वचक्रात्मना परिणतां, कामीं, कामेश्वरात्मकमन्मथसम्बन्धिनीं कलां, चित्कलां। काम्यरूपां-कमनीयस्वरूपां, विदित्वा-ध्यात्वा चिन्तित्वेति शाखान्तरपाठः। नरः उपासकः, कामरूपोमन्मथसुन्दरः सद्यः सकलवनिताक्षोभकरो जायते ॥ अत्यल्पमिदमुच्यत इत्याह काम्य इति अविशेषेण श्रवणात् त्रिभुवनान्तर्वर्तिसकलजनैरभिलषणीयस्वरूपश्च भवति। तदुक्तं भगवत्पादैः-

ध्यायेद्योहरमहिषिते मन्मथकलां ॥ ससद्यस्संक्षोभंनयतिवनिता
इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगां ॥ इति ॥

कामरूपत्वकाम्यत्वकामः कामकलां ध्यायेदिति गुणफलसंबन्धविधिः। अत्र फलार्थतया विधेयस्य ध्यानस्य स्वतः क्रियारूपस्याश्रयान्तरानपेक्षतया श्येनक्रत्वादेस्सौमिकांगसंवलितत्वस्येव बहिर्यागांगसंवलितत्वस्याप्यभावेन बहिर्यागाद्बहिरप्यनुष्ठानात् फलमिति तु भगवत्पादाशयः।

बिन्दुं संकल्प्य वक्त्रन्तु तदधस्थं कुचद्वयं ॥
तदधस्सपरार्धन्तु चिन्तयेत्तदधोमुखं ॥

इति नित्याषोडशिकार्णवे ॥ क्रतुप्रकरणस्थविधिनास्य ध्यानस्य क्रत्वर्थत्वमपि स्मर्यत इति चेत् किन्तावता अन्नाद्यकामनाफलकावेष्टेरिव फलार्थिनो बहिः प्रयोगस्याप्यक्षतत्वात्, अत एव भगवत्स्मरणमुपक्रम्योक्तं शाण्डिल्यभक्तिसूत्रे। बहिरन्तरस्थमुभयमवेष्टिसववदिति ॥

बहिर्यागद्रव्याणि बहिर्यागद्रव्यप्रतिपत्तिश्च विधातुं द्वादशीमृचमाह ॥

(12) परिस्रुतं झषमाद्यं पलं च भक्तानि योनीः सुपरिष्कृतानि ॥ निवेदयन् देवतायै महत्यै स्वात्मीकृत्य सुकृती सिद्धिमेति ॥

परिस्रुतमिति ॥ झषोमत्स्यः । पलं मांसं, तस्य झषत्याच परिस्रुतम्, प्रथमस्योत्तरं द्वितीयमित्यर्थः । तेनझषस्तृतीयः भक्तानि, वटकचणकादि मुद्गाद्यात्मकानि नानाविधान्यन्नानि ॥ चतुर्थं योनिपदं कुण्डगोळोद्भवोपलक्षणं तत्पञ्चमं । योनीरिति बहुवचनन्तु ब्राह्मणक्षत्रियादि कतिपयजातिभेदाभिप्रायं ॥ तदुपबृंहणं कलाष्टकादिपदेन तन्त्रेषु द्रष्टव्यं । चकारः पञ्चानां समुच्चयपरः । पलस्य झषोत्तरं पठितस्यापि झषात्पूर्वं आद्यपदेन निवेशात् मकाराणां क्रमो विवक्षितो ध्वन्यते । तेन मुख्यालाभे प्रतिनिधिभिरर्चनस्य न्यायेन मपञ्चकालाभेपि नित्यक्रमप्रत्यवमृष्टिः इति ॥ कल्पसूत्रेण च सिद्धत्वेपि पूर्वपूर्वालाभेसति नोत्तरोत्तरस्य मुख्यस्य लाभेपि ग्रहणमिति द्योतितं ॥ प्रथममात्रालाभेपि चतुर्थस्य नैवेद्यार्थमावश्यकत्वात् तावन्मात्रग्रहणं सम्प्रदायलभ्यं ॥ आज्यमिति शाखान्तरीयपाठे घृतमेवार्थः । तत्र पक्वनित्यर्थेन तत् काकाक्षिगोळकन्यायेनोभयोर्विशेषणं । अजसम्बन्धीति व्याख्यातु न युक्ता तन्त्रे विकारार्थकस्य दर्शनात् सूत्रोक्तानां पञ्चत्वादीनां परिसंख्यापत्तेश्च परदेवतातर्पणमात्रपर्याप्तमात्रस्य लाभेपि न प्रतिनिधिनायागः ॥ बहिर्यागे स्वात्मीकारस्य प्रतिपत्तित्वेन तल्लोपेपि बाधकाभावादित्यादिकन्तु षाष्ठन्यायसिद्धमूहनीयं ॥ सुपरिष्कृतानि दृष्टादृष्टसंस्कारैस्संस्कृतानि ते

च पाकादिरूपालौकिकाः शापमोचनादिरूपा वैदिकाश्च बहवस्तन्त्रेषु प्रसिद्धाः ॥

बहुलं वा स्वगृह्योक्तमिति न्यायेन

कल्पसूत्रोक्तमात्रा वा, महत्यै देवतायै महाद्रव्यै निवेदयन्, यजन् सुकृतीबहिर्यागकर्ता, तानि स्वात्मीकृत्य स्वयमपि भक्षयित्वा, सिद्धिं, यागफलं, एति प्राप्नोति, परस्परसमुच्चितप्रथमादि मपञ्चकवता यागेन महादेवीदेवताकेनेष्टसिद्धिं भावयेदिति विधिपर्यवसानादिप्रकारोन्तर्यागविधिवदेव द्रष्टव्यः। देवतायास्सगुणध्यानं कर्तव्यंगमुपदेष्टुं त्रयोदशीं ऋचमाह ॥

(13) सृण्येवसितयाविश्वचर्षणिः पाशेन प्रतिबध्नात्यभीकान् ॥ इषुभिः पञ्चभिर्धनुषा च विध्यत्यादिशक्तिररुणा विश्वजन्या ॥

सृण्येवसितयेति। इत्थंभूतलक्षणे तृतीया। सितया श्वेतया रजतमय्या सशयोरभेदान्निशितया तीक्ष्णधारया वा। सृण्या अङ्कुशेन, इवोपलक्षिता विश्वजन्या, विश्वं जन्यं यस्यास्सा विश्वजगज्जननी अरुणा, लौहित्यवती आदिशक्तिर्महात्रिपुरसुन्दरी विश्वचर्षणिः प्राणिमात्रस्य शुभाशुभकर्मद्रष्ट्रीसती, अभीकान् कामुकान्, तृष्णया, लौल्येनेह मार्गे प्रवर्तमानान्भ्रष्टान् पाशेन प्रतिबध्नाति पाशेन तान्बध्वा धनुषा पञ्चभिरिषुभिः बाणैर्विध्यति च अधःपातयतीति यावत् तृष्णाहीनान्वैधभिया प्रवर्तमानान् ऊर्ध्वं नयतीति तु विधिसिद्धमेवेति पुनर्नोक्तं, तदुक्तं ॥

विधिबुध्यैव सेवेत तृष्णया चेत्सपातकी ।
यैरेव पतनं द्रव्यैर्मुक्तिस्तैरेव चोदिता ।
अभीकस्यानभीकस्येत्येवमेते व्यवस्थिताः ॥ इत्यादि ।

सृण्येवेति द्विविधा सृणिर्भवति भर्ता च हन्ताचेति तु यास्कः। इव शब्दस्सर्वत्रान्वितस्सन् सगुणरूपस्य भक्तानुग्रहार्थं कल्पितत्वेन निर्गुणरूपस्यैव पारमार्थिकत्वं व्यञ्जयति ॥ सगुणस्य कल्पितत्वादेव स्त्रीपुंसयोस्समप्राधान्यमुपदेष्टुं चतुर्दशीमृचमाह भगश्शक्तिरिति ॥

(14) भगश्शक्तिर्भगवान्काम ईश उभादातारात्विहसौभगानां ॥ समप्रधानौसमसत्वौ समोतयोस्समशक्तिरजरा विश्वयोनिः ॥

भगोविमर्शपर्यायः,[1] ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा ॥

इत्यादि स्मृतिभिः ईश्वरत्वशरीरघटको यावान्धर्मराशिः स सर्वोपि भगपदेनेह निर्दिष्टः । तादृशो धर्मसमूह एव शक्तिरित्युच्यते ॥ उपास्यत्वेन वर्णितायाः स्त्रीरूपाया देवताया इदं स्वरूपं ॥ तदुक्तं, नागानन्दसूत्रे,

प्रकाशात्मनो ब्रह्मणः स्वभावात्मकविमर्शं प्रकम्य, एष एव विमर्शश्चिति श्चैतन्य मात्मा स्वरसोदिता परा वाक् स्वातन्त्र्य परमा-

---

[1]पाठान्तरं भगः ईशपर्यायः

स्मौन्मुख्य मैश्वर्यं सतत्वं सत्ता स्फुरत्ता सारो मातृका मालिनी
हृदय मूर्मिः स्वसवित्स्पन्दः ॥

इत्यादिशब्दैरागमैरुद्घुष्यते इति ॥ एतेषां धर्मविशेषाणां विवरणं तद्भाष्य एव द्रष्टव्यं ॥ भगवान् तादृशधर्मसमूहविशिष्ट एव । काम ईशः कामेश्वरः इदमेवोपास्यदेवतायाः पुमात्मकं रूपं । इहोपासनाया सौभगानां धर्मार्थकामरूपाणां विविधफलानां दातारौ उभावपि एकस्या एव देवताया द्वेधापि सगुणध्याने त्रिवर्गसिद्धिरित्यर्थः ॥ समप्रधानौ समसत्त्वौ सत्त्वशब्दो गुणपरः तेन परस्परगुणगुणिभावापन्नावित्यर्थः । कामेश्वर्याः कामेश्वराङ्कनिलयत्वेन ध्याने शिव आधारत्वाद्गुणः शक्तिः प्रधानं, शिवस्यार्धाम्बिकासमायुक्तत्वेन ध्याने करशीर्षाद्यवयवविशेषरूपत्वात् शक्तिर्गुणः, शिव एव प्रधानमितिभावः । एवमभिमतफलदानसामर्थ्यस्यान्योन्यगुणप्रधानभावस्यच साम्येपि जगत्कर्तृत्वांशः शक्तिनिष्ठ एव, तेन स्त्रीरूपध्यानेनैव शीघ्रं फलसिद्धिरिति ध्वनयन्नाह समोतयोरिति सम्यक्परस्पराभेदेन ओतयोर्मिलितयोरर्धनारीश्वररूपयोश्शिवशक्त्योर्मध्ये समशक्तिः सर्वशक्तिः निखिलधर्मसमूहात्मिका देव्येव विश्वयोनिर्जगत्कर्त्री । तथा च शक्तिसूत्रं चितिःस्वतन्त्राविश्वसिद्धिहेतुरिति समशब्दः उरुष्याणो अघा यतः समस्मात् इत्यादौ प्रसिद्धः सर्वपर्यायः । अजरेति विश्वयोनित्वांशे विशेषणं जगत्कर्तृत्वं प्रत्यक्षादिप्रमाणसिद्धत्वेन शङ्काकलङ्कराहित्यादतमित्यर्थः । तदुक्तं भागवते

शक्तिः करोति ब्रह्माण्डं सावै पालयतेखिलं ।
इच्छया संहरत्येषा जगदेतच्चराचरं ।

न विष्णुर्नहरो नेन्द्रो न ब्रह्मा न च पावकः ।
नार्को न वरुणश्शक्ताः स्वे स्वे कार्ये कथञ्चन ॥
तया युक्ता हि कुर्वन्ति स्वानि कार्याणि ते सुराः ।
कारणं सैव कार्येषु प्रत्यक्षेणावगम्यते ॥ इति ॥ अन्यत्रापि
शिवोऽपि शवतां याति कुण्डलिन्या विवर्जितः ।
शक्तिहीनोऽपि यः कश्चिदसमर्थः स्मृतो बुधैः ॥

इत्यादि विशेषस्सेतुबन्धे द्रष्टव्यः । तेन शिवस्य विद्यमानमपि फलदातृत्वादिकं शक्त्यधीनत्वाद्विळम्बितं । शक्तेस्तु निरपेक्षत्वादविळंबितं इति शीघ्रसिद्धिकामैः स्त्रीरूपैव देवता ध्यातुं युक्तेति भावः । एवं सगुणध्यानमुक्त्वा निर्गुणध्याने वक्तव्यांशाभावात्तज्जन्यफलं तज्जननप्रणालिकाश्चोपदेष्टुं पञ्चदशीमृचमाह परिस्रुतेति ॥

(15) परिस्रुताहविषापावितेनप्रसंकोचेगलितेवैमनस्तः ॥ सर्वः सर्वस्य जगतो विधाता भर्ता हर्ता विश्वरूपत्वमेति ॥

कर्ममार्गज्ञानमार्गभक्तिमार्गेषु तत्तच्छास्त्रप्रवर्तकैः प्रणाडिका नानाविधाः परस्परविलक्षणा उक्ताः । तास्सर्वा अपि दुस्साधाश्चिरकालफलप्रदा इति तु तत्तच्छास्त्रविदां स्पष्टमेव ॥ अत्र तु द्रव्यस्वीकारैरावर्त्यमानैरुल्लासपरम्परैव प्रणाडिका । तत्र प्रौढोल्लासपर्यन्तं समयाचारिकृता धर्माः, तदन्तोल्लासे याथाकाम्यं, चरमोल्लासे ब्रह्मस्वरूपतेति ॥ तथा च कल्पसूत्रम्, आरम्भतरुणयौवन प्रौढतदन्तोन्मनाऽनवस्थोल्लासेषु प्रौढान्तं समयाचारः ततः परं यथाकामीति ।

उल्लाससप्तकलक्षणानि कुलार्णवादिषु द्रष्टव्यानि । यद्यपि प्रतिदिनं सुषुप्तिदशायां ब्रह्मस्वरूपतावाप्तिर्जायत एव । तदानीं मनसो विलीनत्वात् तथाप्यविद्यापरिणामविशेषरूपया निद्रया संवलितत्वान्नसा पुरुषार्थः । निद्राराहित्येन तादृशी दशा तु पुरुषार्थ एव । यां ज्ञानभूमिकासु सप्तमीं मन्यन्ते ज्ञानिनः । याञ्च निर्विकल्पकसमाधित्वेन व्यवहरन्तोनुभवन्ति योगिनः सैवोन्मनोत्तरानवस्थोल्लासेपि योगिभिरनुभूयते, तदुक्तं,

आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितं ।
तस्याभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते ॥ इति ॥

कल्पसूत्रे तु

तस्याभिव्यंजकाः पञ्च मकारा इत्युक्तम् ॥

परन्तु तदेव द्रव्यमयज्ञांगञ्चेदपवित्रं पीतं तदा पुरुषार्थनिषेधप्रवृत्त्या पापेन प्रतिबद्धं न तां दशामुत्पादयितुं क्षमं, मन्त्रैः पावितं हवीरूपमेव तु समाधिदशामुत्पादयति । तदुक्तं समयाचारस्मृतौ ।

असंस्कृतं पशोः पानं कलहोद्वेगपापकृत् ।
मन्त्रपूजाविहीनं यत्पशुपानं तदेव हि ॥
पशुपानविधौ पीत्वा वीरोपि नरकं व्रजेत् ।
संस्कृतं बोधजनकं प्रायश्चित्तं च शुद्धिकृत् ॥
मन्त्राणां स्फुरणन्तेन महापातकनाशनम् ।
आयुः श्रीः कान्तिसौभाग्यं ज्ञानं संस्कृतपानतः ॥
अष्टैश्वर्यं खेचरत्वं पतनं विधिवर्जितं ।

सौत्रामण्यां कुलाचारे मदिरां ब्राह्मणः पिबेत् ।
अन्यत्र ब्राह्मणः पीत्वा प्रायश्चित्तं समाचरेत् ॥ इत्यादि । परन्तु
वरं प्राणाः प्रगच्छन्तु ब्राह्मणो नार्पयेत्सुरां ।
ब्राह्मणो मदिरां पीत्वा ब्राह्मण्यादेव हीयते ॥

इत्यादि शक्तिसंगमतन्त्रराजादिवचनैर्निषिद्धत्वात् । इह धर्मपाशनिरसनोपायस्सम्प्रदायादेवावसेयः ॥ व्यवस्थाप्रकाराश्च कौलोपनिषद्भाष्ये अस्माभिः प्रदर्शिताः । ततश्च तदधिकारिणां तादृशैरुल्लासैरन्तःकरणावच्छिन्नस्य जीवात्मनोऽन्तःकरणोपाधिकृतसंकोचापनये सति ब्रह्मभावे किमवशिष्यते । न च द्रव्योल्लासस्यागमापायित्वेन न तावतैव कृतार्थतेति वाच्यं । अस्य पर्यनुयोगस्य समाधावपि तुल्यत्वात् । अथ तत्र पवननियमनादिभिरुपायैः पुनः पुनस्समाधिप्रवेशनेन चिराभ्यासपाटवेन कतिपयदिवसोत्तरं विनापि पवननिरोधं सार्वकालिकस्समाधिरुत्पद्यते । समुद्रे नौकामारुहय गच्छतां तत्कल्लोलैस्सुचिरमान्दोलितवतां नौकावरोहणेप्यान्दोळनानुवृत्तिदर्शनात् इति चेत्तुल्यं प्रकृतेपि ॥ संस्कृतद्रव्यपानजन्योन्मन्यावस्थाभ्यासपाटवेन विनापि द्रव्यं कतिपयदिवसैस्तादृशदशाया अकृत्रिमायास्सिद्धेः । अक्षरार्थस्तु पावितेन, मन्त्रसंस्कारसंस्कृतेन हविषा-देवीपूजाशेषभूतेन, परिस्रुता-पीयमानेन, मनस्तः-अन्तःकरणाज्जाते संकोचे-अत्मनः परिच्छेदे, प्रगलिते-निर्व्युत्थानं बिलीने सति, उन्मन्युल्लासोत्तरानवस्थायामिति यावत् ॥ वै निश्चयेन सर्वः सर्वात्मको भवति। तेन स्वात्मैकविषयकनिर्विकल्पकवृत्तिजनको मद एवान्तर्यागविधायकवाक्ये धात्वर्थ इत्युपसंहृतं भवति । अनेनैवाशयेन तन्त्रे मत्तस्य बहुवि-

धता प्रतिपाद्यते ॥

रमन्ते कामुका मत्ताः मत्ताः कुप्यन्ति कोपिनः ।
गायन्ति गायका मत्ताः मत्ता ध्यायन्ति योगिनः ॥ इति ॥

तेन योगविशेषोप्येतत्सहायत्वेनाक्षिप्तः ॥ सर्वात्मकत्वमेव विवृणोति सर्वस्य जगतो विधाता ब्रह्मा। भर्ता विष्णुः हर्ता रुद्रश्च स एव किं बहुना दासदाशकितवादिप्राणिमात्ररूपस्स एव भवति इत्याह विश्वरूपत्वमेति इति ॥ शरीरपातस्तु प्रारब्धवशाद्यदाकदापि यत्र क्वापि भवतु न तावतास्य कोपि विशेषः ॥ कृतकृत्यत्वादिति भावः। उक्तं च कल्पसूत्रे इत्थं विदित्वा विधिवदनुष्ठितव्रतः कुलनिष्ठस्य सर्वतः कृतकृत्यता शरीरत्यागे श्वपचगृहकाश्योर्नान्तरं सजीवन्मुक्त इति ॥

इत्थं त्रैपुरसिद्धान्तं कथितमुपसंहरन्नेतदध्ययनादपि फलमस्तीत्युपदेष्टुं षोडशीं यजुरन्तामृचमाह इयं महोपनिषदिति ॥

(16) इयं महोपानिषत् त्रिपुराया यामक्षरं परमे गीर्भिरीट्टे। एषर्ग्यजुः परमेतच्च सामेवाऽयमथर्वेयमन्या च विद्योम् ॥ इत्युपनिषत् ॥

उपबृंहितश्चैतत् कल्पसूत्रकृता भगवता श्रीपरशुरामेण

य इमां दशमखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूतामधीते स सर्वेषु यज्ञेषु यष्टा भवति यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति हि श्रूयते इत्युपनिषत् इति शिवमिति ।

एतेनास्यां महोपनिषदि ये अकथिता अपेक्षिता अर्थाः ते कल्पसूत्राद्ग्राह्याः । कल्पसूत्राधिकरणे शाखाभेदेन विप्रकीर्णानामगानामुपसंहारसमर्थान्प्रत्येव प्रयोगशास्त्रस्य प्रामाण्यसमर्थनादिति सिध्यति ॥ अक्षरार्थस्तु इयं त्रिपुराया महोपनिषत् रहस्यप्रतिपादकवाक्यसन्दर्भरूपा पठनीयेति शेषः । तत्र हेतूनाह यामित्यादिना परममक्षरं ब्रह्म कर्तृ यामिमां उपनिषदं गीर्भिः स्तुतिवाग्भिः ईट्टे स्तौति ईडस्तुताविल्यस्य रूपं । परमे इति सोऽशे आदेशः । यां ब्रह्मेति पदयोर्व्यत्यासेन प्रथमाद्वितीयान्ततास्वीकारेणोपनिषत्कर्तृकब्रह्मकर्मकस्तुतिर्वा । परमेश्वरेणापि स्तुतत्वात् तत्स्तावकत्वाच्चेत्यर्थः ॥ हृल्लेखाक्षरं यां त्रिपुरां स्तौतीति वा । परं, ए, इति छेदः एकाररूपमक्षरमिति वा ।

यदेकादशमाधारं बीजं कोणत्रयोद्भवं ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥ इति वचनात् ।

एकोरपि, अ, ई, इति छेदो वा ।

अकारो वै सर्वा वाक् यदीँ श्रृणोत्वलकँ श्रृणोतीति श्रुतेः । चरम ओंकारो वा अक्षरे विशेष्यत्वेनान्वेति ॥ सः गीर्भिः अकारोकारमकारैः परमोऽखण्डोपि यां स्तौतीत्यर्थः ॥

समस्तं व्यस्तं वा शरणदगृणात्योमिति पदं ॥ इति शिवरहस्ये स्मरणात् ।

स्वाध्यायोध्येतव्य इति विधिविहितविविधाध्ययनान्यपि एतदध्ययनेनैव सिध्यन्तीत्याह एषेति । ऋगादिशब्दा वेदपराः नत्वेकैकमन्त्रपराः । अथर्वादिप्रायपाठात् ॥ एषा एतत् अयं इति शब्दा ऋग्यजुषाथर्वणां विशेष्यत्वाभिप्रायेण ॥ साम्नोध्वनिरूपत्वेनानक्षरत्वात्

इवेति पदेनाक्षरेषु तत्तुल्यफलकत्वद्योतनं ॥ अष्टादशविद्यासु चतुर्णामु-पादानात् अन्यपदेनोपवेदाद्याश्चतुर्दश गृह्यन्ते ॥ सर्वस्वरूपेयमुपनिषदि-त्यर्थः । प्रणवस्वरूपाप्येषैवेत्याह ओमिति ॥ ओमाङोश्चेति पररूपं तेन यतिभिरप्यध्येतव्येति भावः ॥ इयमुपनिषदेतादृशीत्येवं यो ह्येतस्या महिमानं वेद तस्य महिमानं साक्षात् श्रुतिरपि वक्तुमसमर्था तस्य ब्रह्मैकरूपत्वात् तत्रवाचामप्रवृत्तेरित्याशयेन श्रुत्या मौनमास्थितं इत्युपनि-षदिति ॥ इतोऽधिकस्य रहस्यस्य वक्तव्यांशस्याभावादिति भावः ॥ इति श्रीः ॥

इति भास्कररायेणाग्निचिता त्रिपुरामहोपनिषदोऽर्थाः ।
प्रकटयितुमयोग्या अपि विदुषां तोषाय कतिपये कथिताः ॥

इति श्रीमद्भास्कररायमहाशयरचितं त्रिपुरोपनिषद् भाष्यं सम्पूर्णम् ॥

वाङ्मे मनसीति शान्तिः ॥

श्री ललितामहात्रिपुरसुन्दर्युपनिषत् ॥

(बह्वृचवेदीया)

देवीह्येकाग्र आसीत् । सैव जगदण्डमसृजत् । कामकलेति विज्ञायते । शृंगारकलेति विज्ञायते । तस्या एव ब्रह्माजीजनत् । विष्णुरजीजनत् । रुद्रोजीजनत् । सर्वे मरुद्गणा अजीजनन् । गन्धर्वाप्सरसः किन्नरावादित्रवादिनस्समन्तादजीजनन् । भोग्यमजीजनत् । सर्वमजीजनत् । सर्वं शाक्तमजीजनत् । अण्डजं स्वेदजमुद्भिज्जं जरायुजं यत्किञ्चैतत्प्राणिस्थावरजङ्गमं मनुष्यमजीजनत् । सैषा पराशक्तिः । सैषा शांभवी विद्या । कादि विद्येति वा हादि विद्येति वा सादि विद्येति वा रहस्यं । ओं ओं वाचि प्रतिष्ठा सैव पुरत्रयं शरीरत्रयं व्याप्य बहिरन्तरवभासयन्ती देशकालवस्त्वन्तरसङ्गात् महात्रिपुरसुन्दरी वै प्रत्यक्चितिः । सैवात्मा ततोऽन्यदसत्यमनात्मा अत एषा ब्रह्मसंवित्तिर्भावा भावकला विनिर्मुक्ता चिदाद्या अद्वितीय ब्रह्मसंवित्तिः सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति । यदस्ति सन्मात्रं यद्विभाति चिन्मात्रं यत्प्रियमानन्दं तदेतत्सर्वाकारा महात्रिपुरसुन्दरी । त्वञ्चाहञ्च सर्वं विश्वं सर्वदेवता इतरत्सर्वं महात्रिपुरसुन्दरी । सत्यमेकं ललिताख्यं वस्तु । तदद्वितीयमखण्डार्थं परंब्रह्म ।

पञ्चरूपपरित्यागादस्वरूपप्रहाणतः ।

अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महदिति ॥

प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते । तत्त्वमसीत्येव संभाष्यते । अयमात्मा ब्रह्मेति वा ब्रह्मैवाहमस्मीति वा योहमस्मीति वा सोहमस्मीति वा योऽसौ सोहमस्मीति वा या भाष्यते सैषा षोडशी श्रीविद्या पञ्चदशाक्षरी महात्रिपुरसुन्दरी बालाम्बिकेति वा बगळेति वा मातङ्गीति स्वयंवरकल्याणीति भुवनेश्वरीति चामुण्डेति चण्डेति वाराहीति तिरस्करिणीति राजमातंगीति वा शुकश्यामळेति वा लघुश्यामळेति वा अश्वारूढेति वा प्रत्यंगिरा धूमावती (पा. गायत्री) सावित्री सरस्वती ब्रह्मानन्दकलेति ॥

ऋचो अक्षरे परमे व्योमन् । यस्मिन्देवा अधिविश्वे निषेदुः । यस्तन्नवेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासते । इत्युपनिषत् । वाङ्मे मनसीति शान्तिः ॥

॥ इति बह्वृचवेदीया ललितामहात्रिपुरसुन्दर्युपनिषत्समाप्ता ॥

अथर्वपाठकास्तेऽपि प्रयान्ति परमां गतिम् ॥ इति नागर खण्डे॥

देव्यथर्वशीर्षोपनिषत् ॥

ओं भद्रंकर्णेभिरिति शान्तिः ॥

ओं सर्वे वै देवा देवीमुपतस्थुः । कासि त्वं महादेवि । साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यञ्चाशून्यं च अहमानन्दानानन्दाः । विज्ञानाविज्ञाने अहं । ब्रह्माब्रह्मणी वेदितव्ये । इत्याहाथर्वणीश्रुतिः । अहं पञ्चभूतान्यपञ्चभूतानि । अहमखिलं जगत् । वेदोहमवेदोहं विद्याहमविद्याहं । अजाहमनजाहं । अधश्चोर्ध्वं च तिर्यक्चाहं । अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः । अहं मित्रावरुणावुभा बिभर्म्यहमिन्द्राग्नी अहमश्विनावुभौ । अहं सोमं त्वष्टारं पूषणं भगं दधाम्यहं । विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ॥ अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते । अहं राष्ट्रीसंगमनीवसूनामहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तस्समुद्रे ॥ य एवं वेद स देवीपदमाप्नोति । ते देवा अब्रुवन् । नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मतां । तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां । दुर्गां देवीं शरणमहं प्रपद्ये सुतरां नाशयेत तमः । देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सानोमन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु । कालरात्रिं ब्रह्मस्तुतां वैष्णवीं

स्कन्दमातरं सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवां। महालक्ष्मीश्च विद्महे सर्वसिद्धिश्च धीमहि। तन्नो देवी प्रचोदयात्। अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायन्त भद्रा अमृतबन्धवः। कामो योनिः कमला वज्रपाणिर्गुहाहसामातरिश्वाभ्रमिन्द्रः। पुनर्गुहा सकला मायया च पुनः कोशा विश्वमाताऽदितिर्विद्यां। एषात्मशक्तिरेषा विश्वमोहिनी पाशाङ्कुशधनुर्बाणधरा एषा श्रीमहाविद्या य एवं वेद सशोकं तरति। नमस्ते अस्तु भगवति भवति मातरस्मान्पातु सर्वतः। सैषाष्टौ वसवः सैषैकादशरुद्राः। सैषा द्वादशादित्याः। सैषा विश्वेदेवास्सोमपा असोमपाश्च॥ सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षास्सिद्धाः। सैषा सत्त्वरजस्तमांसि सैषा प्रजापतीन्द्रमनवः। सैषा ग्रहनक्षत्रज्योतींषि-कलाकाष्ठादिकालरूपिणी तामहं प्रणौमि नित्यं। तापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीं। अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवां। वियदीकारसंयुक्तं वीतिहोत्रसमन्वितं। अर्धेन्दुलसितं देव्याबीजं सर्वार्थ-साधकं। एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः। ध्यायन्ति परमानन्दमया ज्ञानांबुराशयः। वाङ्माया ब्रह्मभूस्तस्मात्षष्ठंवक्त्रसमन्वितं। सूर्योवापश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः॥ नारायणेन संयुक्तो वायुश्चाधरसंयुतः। विच्चेनवार्णकोणुस्स्यान्महदानन्ददायकः। हृत्पुण्डरीकमध्यस्थां प्रातः सूर्यसमप्रभां। पाशांकुशधरां सौम्यां वरदाभयहस्तकां। त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे॥ नमामि त्वामहं देवीं महाभयविनाशिनीं॥ महादुर्गप्रशमिनीं महाकारुण्यरूपिणीं। यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यतेऽज्ञेया। यस्या अन्तो न विद्यते तस्मादुच्यतेऽनन्ता। यस्या ग्रहणं नोपलभ्यते तस्मादुच्यतेऽलक्ष्या। यस्या जननं लोपलभ्यते

तस्मादुच्यतेऽजा। एकैव सर्वत्र वर्तते तस्मादुच्यत एका। एकैव विश्वरूपिणी तस्मादुच्यते नैका। अत एवोच्यतेऽज्ञेयानन्तालक्ष्याऽजैका नैकेति॥ मन्त्राणां मातृकादेवी शब्दानां ज्ञानरूपिणी। ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी। यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता। दुर्गात्संत्रायते यस्माद्देवी दुर्गेति कथ्यते। प्रपद्ये शरणं देवीं दुंदुर्गे दुरितं हर। तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीं। नमामि भवभीतोऽहं संसारार्णवतारिणीं॥ इदमथर्वशीर्षं योऽधीते सपञ्चाथर्वशीर्षजपफलमवाप्नोति। इदमथर्वशीर्ष[1]मज्ञात्वा योर्चां स्थापयति शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिन्न[2] विन्दति॥ शतमष्टोत्तरं चास्याः पुरश्चर्याविधिः स्मृतः। दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते। महादुर्गाणि तरति महादेव्याः प्रसादतः। सायमधीयानो[3] दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायंप्रातःप्रयुञ्जानोऽपापो भवति निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति। नूतनप्रतिमायां जप्त्वा देवतासान्निध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति य एवं वेदेत्युपनिषत्॥ ओं भद्रकर्णेभिरिति शान्तिः॥ ओं तत्सत्॥

इति देव्यथर्वशीर्षोपनिषत् समाप्ता॥

मुम्बा पुस्तके पाठान्तराणि – [1] शीर्षं ज्ञात्वा। [2] सिद्धिं च विन्दति।
[3] प्रातरधीयानो रात्रिकृतं पापं नाशयति।
सायमधीयानो दिवसकृतं पापं नाशयति।
सा तत्प्रायंप्रातः प्रयुञ्जानः पापोऽपापो भवति।

श्री कौलोपनिषत् भाष्यञ्च

ओं शन्नः कौलिकः शन्नो वारुणी शन्नश्शुद्धिः शन्नोग्निश्श-न्नस्सर्वं समभवत् ॥

श्रीगुरुचरणाब्जकिरणविसरणनिर्धूतहृद्गतावरणः।
भास्कररायः कौलोपनिषदमाथर्वणीं विकासयति ॥

वक्ष्यमाणातिरहस्यार्थोपदेशे अवश्यभाविविघ्ननिरासाय देवताः प्रार्थयते शन्नः कौलिक इत्यादिना ॥
कुलमार्गप्रवर्तकः कौलिकः परशिवः शं- विघ्ननिराकरणपूर्वकं स्वात्मानन्द-प्रापकः, नः- अस्माकं, समभवत्-भूयात्, वारुणी-प्रथमाभिमानिनी महती देवता च, शन्नो-भूयात् ॥ शुद्धिः- द्वितीयाभिमानिनी देवतापि शन्नो-भूयात् अग्निस्तेजः किंबहुना सर्वमपि सुखकरं भवतु ॥

नमो ब्रह्मणे नमः पृथिव्यै नमोद्भ्यो नमोग्नये नमो वायवे नमो गुरुभ्यः त्वमेव प्रत्यक्षं सैवासि त्वामेव प्रत्यक्षं तां वदिष्यामि ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मां अवतु वक्तारं ओं शान्तिश्शान्तिश्शान्तिः ॥

परब्रह्मणे पृथिव्यादिचतुष्टयदेवताभ्यः परमशिवादिस्वगुरुपर्यन्ते-भ्यश्च नमः॥ भूतचतुष्टयमाकाशस्याप्युपलक्षणं। प्रत्यक्षं अहं प्रत्ययव्या-

सि

जेन सर्वैरनुभूयमानं ब्रह्म सैव त्वमेवासि। त्रिपुरसुन्दरीरूपकौलोपनिषदति अत एव हे कौलोपनिषत् त्वामेव तदभिन्नामहं वदिष्यामि। ऋतशब्दो ब्रह्मपरः। सत्यशब्दोपि तथैव। आद्रे वीप्सा स्पष्टमन्यत्। शान्तिश्शान्तिश्शान्तिरिति विघ्नशान्ति प्रार्थनेयम्॥

अथातोधर्मजिज्ञासा। ज्ञानं बुद्धिश्च ज्ञानं मोक्षैककारणम् मोक्षस्सर्वात्मतासिद्धिः। पञ्च विषयाः प्रपञ्चः। तेषां ज्ञानिस्वरूपाः। योगो मोक्षः॥

अथ ब्रह्मजिज्ञासानन्तरं धर्मिज्ञानस्य जातत्वात् धर्मस्य विमर्शशक्तेः ज्ञानस्य विचारः कर्तव्य (इत्यर्थः)॥

ज्ञानं बुद्धिश्च, ब्रह्मापरोक्षानुभवो ज्ञानं। तज्जनकन्तु शाब्दं, परोक्षज्ञानं बुद्धिः। यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते॥ इत्यादौ द्वैविध्यव्यवहारदर्शनात् तदुभयमपि धर्मस्वरूपमेवेत्यर्थः॥ चकारादनुक्तानां चैतन्यादिधर्माणां नागानन्दादिभिर्गणितानां परिग्रहः॥ ज्ञानं मोक्षैककारणं स्पष्टोर्थः॥ मोक्षस्सर्वात्मतासिद्धिः। सर्वस्य स्वात्माभेदस्स र्वात्मता तस्यास्सिद्धिस्तद्विषयसविलासाज्ञाननिवृत्तिः। तेन देवीभागवते कथितार्धश्लोकभागवतस्य "सर्वं खल्विदमेवाहं नान्यदस्ति सनातनं" इत्यस्य समानार्थकज्ञानं मोक्षजनकं इति ध्वनितं। तादृशज्ञानजन्यमखण्डं वृत्त्यन्तरं वा-पञ्चविषयाः प्रपञ्च इति सर्वपदं विवृणोति। शब्दादिविषयपञ्चकं प्रपञ्चपदेनोच्यते॥ तेषां भूतसूक्ष्मत्वेन स्थूलभूतानां तदभेदात् षट्त्रिंशत्तत्त्वानामपि तत्रान्तर्भावात् सर्वत्र पञ्चभूतानि षष्ठं किंचिन्नवि-

द्यते ॥ इति वासिष्ठात् ॥ तेषां ज्ञानस्वरूपा इति जडजातं निर्दिश्य चेतनजातं निर्दिशति ॥ ज्ञश्चासावनश्चज्ञानं विषयान् जानाति प्राणिति चेत्यर्थः ॥ तादृशस्वरूपा जीवा इति यावत् ॥ योगो मोक्ष इति योगोवृत्तिनिरोधः मोक्षोपि ॥

अधर्मकारणाज्ञानमेव ज्ञानं ॥

धर्मरहितत्वादधर्मः परंब्रह्म तस्य यत् कारणाज्ञानं तद्विषयकमूलाज्ञानमेव ज्ञानं एवकारोभिन्नक्रमः विषया जीवा योगो मुक्तिरविद्येत्येतत्सर्वं ज्ञानमेव शक्तेर्भिन्नं नास्त्येवेत्यर्थः। भेदस्य मिथ्यात्वादिति भावः। प्रपञ्च ईश्वरः भेदव्याप्यस्य नियम्यनियन्तृभावस्यापि व्यापकविरुद्धोपलब्ध्यामिथ्यात्वात्

प्रपञ्च एवेश्वरः ॥ अनित्यं नित्यं

अनित्यत्वेन भासमानं घटादिकमपि नित्यशक्तिरूपमेव।

अज्ञानं ज्ञानं ॥

अवस्थारूपमज्ञानमपि ज्ञानरूपमेव शक्तिरेवेत्यर्थः ॥

अधर्म एव धर्मः ॥

शक्तिरूपो धर्मोपि न पदार्थान्तरं किन्तु धर्माधारधर्मिरूप ब्रह्मैव।

एष मोक्षः ॥

एष एव पन्था मोक्षस्य नान्यः ॥

पञ्चबन्धा ज्ञानस्वरूपाः ॥

अनात्मनि आत्मबुद्धिः आत्मनि अनात्मताबुधिः इत्यादि ज्ञानान्येव बन्धरूपणि । ज्ञानं बन्धः इति शिवसूत्रात् । जीवानां परस्परं भेदः ईश्वरात् भेदः चैतन्यात् भेदः इति ज्ञानत्रयेण सह पञ्च ॥

पिण्डाज्जननं ॥

ईदृशबन्धसद्भावादेव पिण्डाण्डसम्बन्धरूपं जननं भवति ॥

तत्रैव मोक्षः ॥

परन्तु कौलज्ञानमहिम्ना मोक्षोपि तत्रैव पिण्डाण्ड एव भवति न पुनश्शताधिकनाड्युत्क्रमणं देवयानगतिः ब्रह्मणा सह मुक्तिरित्येवं रूपो विळम्बः ॥ तस्य तावदेव चिरं, न तस्य प्राणा उत्क्रामन्ति इत्यादि श्रुत्यन्तरादिति ॥

एतत् ज्ञानम् ॥

प्रथमं शास्त्रसिद्धान्तमुक्त्वा ज्ञाननिष्कर्षमाह एतत् वक्ष्यमाणं ज्ञानसर्वस्वं ॥

सर्वेन्द्रियाणां नयनं प्रधानं ॥

ब्रह्मप्रतिनयेत् ॥ षड्भिरपीन्द्रियैर्जन्येषु प्रत्यात्मकज्ञानेषु अहमिदं जानामीत्यादिप्रकारकेषु अहन्तया भासमानं ब्रह्मैव प्रधानं । तमेव भान्तमनुभाति सर्वमिति श्रुत्या तदितरस्य सर्वस्याप्यनुभासमानतोक्तेः ॥ ईदृशविवेचनं सर्ववृत्तिषु यथास्यात्तथा यतेत ॥ एकेन्द्रियजन्यमपि ज्ञानं विवेचनमन्तरेण प्रधानं नयेत् ॥ ग्राह्यग्राहकसंवित्तिसामन्ये सर्वदेहिनां ।

विशेषोयं तु सम्बन्धसामान्ये सावधानता ॥ इति वचनात् अविवेचनाभाव एव ज्ञानसर्वस्वमित्यर्थः ॥

धर्मविरुद्धाः कार्याः ॥

इतः प्रभृति उपासककर्तव्यप्रकारननुशास्ति । तादृशविवेचकज्ञानाधारैकरसिकानां चित्तस्थैर्याद्यर्थं कर्मकालेपि संविदादिसेवनं धर्मशास्त्रविरुद्धं प्रतिकर्तुं युक्तं ॥

धर्मविहितानकार्याः ॥

धर्मशास्त्रविहिता अपि ज्योतिष्टोमादयः तादृशधाराविरोधसम्भावनायां प्रतिकर्तुं युक्ताः ॥ करणाकरणयोरभ्यनुज्ञानमिदं नत्वात्यन्तिकविधिनिषेधरूपं ॥ गौतमेनापि चत्वारिंशत्संस्कारान् बहिरङ्गानष्टावन्तरंगांश्चोक्त्वा आन्तरशुद्ध्युत्तरं बहिरङ्गानामनावश्यकतोक्ता ॥ मनुनापि सर्वान् धर्मान् विस्तरेणोक्त्वा शास्त्रान्ते ब्रह्माभ्यासं विधाय तत्पराणां स्वपूर्वोक्तधर्मानादर उक्तः ॥ तादृश स्मृतेरियमेव श्रुतिर्मूलम् ॥

सर्वं शाम्भवीरूपम् ॥

विहिताचरण इव निषिद्धाचरणेपि त्रिपुरसुन्दर्या भावनस्याविशेषात् ॥ तत्भावनवैषम्यवतां भ्रष्टानामेव विधिनिषेधकृतो बन्धः इति भावः ॥ अतएव भगवद्वाक्यम् ॥

मत्कर्म कुर्वतां पुंसां कर्मलोपो भवेद्यदि ।
तत्कर्म ते प्रकुर्वन्ति त्रिंशत्कोट्यो महर्षयः ॥ इति ॥

आम्नाया न विद्यन्ते ॥

ज्ञातत्वात् तं प्रति वेदा अपि न प्रवर्तन्ते ॥ अतएवोक्तं भगवत्पादैरध्यासभाष्ये अविद्यावद्विषयाणि शास्त्राणीति ॥ उक्तयोरभ्यनुज्ञयोर्हेत्वर्थवादरूपे सूत्रे ॥

गुरुरेकः ।

एकस्य यथोक्तलक्षणलक्षितस्य गुरोरुपास्त्या अयमर्थो लभ्यते । गुरुबाहुल्येनोपदेशवैषम्ये संशयावश्यम्भावात् । अतएव परशुरामकल्पसूत्रे

एकगुरूपास्तिरसंशयः इति ॥

लब्ध्वा कुलगुरुं सम्यक् न गुर्वन्तरमाश्रयेत् ॥ इति ॥

कुलार्णवोक्तनिषेधस्येयं श्रुतिर्मूलम् ॥ लब्ध्वेत्युक्त्यैव कौलिके गुरवोनन्ता इति शक्तिरहस्यवचनं तादृशगुरोरलाभाभिप्रायम् ॥

सर्वैक्यताबुद्धिमन्ते ॥

ऐक्यमिति स्वार्थे ष्यञ् ॥ एवं रीत्या वर्तमानः साधकोप्यन्तकालेप्यद्वैतबुद्धिमेव लभेत ॥

आमन्त्रसिद्धेः ॥

अधिकारोयं । इत आरभ्य मन्त्रसिद्धिपूर्वकाले ये नियमा अनुष्ठेयास्तेधर्माः कथ्यन्ते इत्यर्थः ॥ तेन वक्ष्यमाणेष्वेकस्याप्यनादरे सिद्धिहानिरेवेति भावः ॥

मदादिस्त्याज्यः ॥

मादकद्रव्यसेवनजन्यो विकारविशेषो मदः ॥ विकारान्तराण्या-

दिपदग्राह्याणि अरिषड्वर्गश्च सन्त्याज्य एव ॥ मन्त्रसिध्युत्तरन्तु स्वतएव कामक्रोधादयो न प्रसरन्ति ॥ विकार विशेषास्तु पूर्वमेवाभ्यनुज्ञाताः ॥ तथाच यावन्न चलते दृष्टिः आगलान्तं पिबेत् द्रव्यं ॥ इति बचनयो र्मन्त्रसाधकसिद्धमन्त्रपरत्वेन व्यवस्थासिद्धेरविरोधः ॥

प्राकट्यं न कुर्यात् ॥

स्वकीयमन्त्रदीक्षोपास्तिरहिताधर्मान्तरेष्वत्यन्तादरशीलाः स्वीयमन्त्रोपासकाभासाश्च सर्वेपि बहिर्मुखाः तैर्यथा अयमेतदुपासक इति न ज्ञायेत तथोपास्तिं गोपयेत् ॥ इदञ्च दीक्षान्तरेष्वपि तुल्यं ॥ नैनमदीक्षितावृतयन्तं पश्यन्ति ॥ इत्यादि तत्तत्प्रकरणगतवचनात् ॥ यद्यप्यस्यादीक्षाया वेदेष्वारण्यककाण्डे विहितत्वादेव रहस्यतासिद्धा क्रत्वंगप्रवर्ग्यादिवत् । तथापि पुनः कण्ठरवेण तद्विधानं रहस्यान्तरेभ्यो वैलक्षण्यार्थं ॥ धर्मान्तरेषु रहस्यभङ्गे क्रतुवैगुण्यमात्रमिहतु तथात्वे नरक एवेति ॥ तथाच भगवान्परशुरामः प्राकट्यान्निरयः ॥ इति

न कुर्यात्पशुसम्भाषणं ॥

बहिर्मुखास्सर्वेपि पशवः विद्याहीनत्वात् एतदुपास्तेरेवविद्यात्वात् न शिल्पादिज्ञानयुक्ते विद्वच्छब्दः प्रयुज्यते ॥ इत्यादि वचनात् ॥ तैस्सह सम्यक् स्वहृदयज्ञापनपर्यन्तं भाषणं न कार्यं । तेनापातभाषणस्य न निषेधः ॥

अन्यायो न्यायः ॥

यदि कश्चिद्वावदूकः पूर्वोत्तरमीमांसान्यायैः कौलिकाचारं दूषयेत्

तथापि न मनागपि कोपः कार्यः इत्याशयेनाह अन्याय इति अल्पार्थो नञ् अल्पबलो न्यायः पूर्वपक्षन्याय इति यावत् ॥ सोपि न्याय एव ॥ न हि पूर्वपक्षोपि न्यायोपन्यासमन्तरेण प्रवर्तते अतस्तादृशन्यायसिद्धोपि न्याय्य एवायं पन्थाः। न चैवं सति सिद्धान्तन्यायेनापवादात्कथमाश्वासः सिद्धान्तानामृषिभेदेन बहुविधत्वेन तदभिमानिभिस्तथा तथोपपादनस्य परस्परविरुद्धस्य पूर्वोत्तरतन्त्रस्थ देवताधिकरणादिषु बहुशो दर्शनात् ॥ वादिनो दौर्बल्यं न न्यायस्येति भावः ॥ तर्काप्रतिष्ठानादिति भगवान् व्यासः ॥ अचिन्त्याः खलु ये भावा न तां स्तर्केण योजयेदिति च ॥ ईदृशन्यायानां चित्तसमाधानैकफलकानां सम्प्रदायाविरोधेनैवोपन्यासस्योचितत्वात् ॥ यथा श्रुतिस्मृतिसम्प्रदायानामुत्तरोत्तरस्य दुर्बलत्वेपि प्रकृततन्त्रे वैपरीत्यमूह्यम् ॥ न चायं सुतरामन्यायः धर्मशास्त्रविद्भिरपि उत्तरोत्तरेण पूर्वपूर्वसंकोचस्य बहुशः स्वीकारात् ॥

न गणयेत्कमपि ॥

ब्रह्माणमपि स्वसिद्धान्तविरोधवादिनं न गणयेत् । अतीव दृढं विश्वसेदित्यर्थः। अतएव विश्वासभूयिष्ठं प्रामाण्यमिति कल्पः ॥

आत्मरहस्यं न वदेत् ॥

प्राकट्यापत्तेर्मित्रायापि नैव वदेदित्यर्थः ॥

शिष्याय वदेत् ॥

अतएव कर्णात्कर्णोपदेशेन सम्प्राप्तमवनीतलं । इति स्मृतिः। ईदृशसम्प्रदायैकज्ञेयत्वेनैवेदृशार्थविषये श्रुतिस्मृत्यपेक्षया सदाचारस्यैव

बलवत्त्वं ॥ व्याकरणापेक्षया सत्प्रयोगरूपाचारस्यैवेत्यादिकमूह्यं ॥

अन्तःशाक्तः बहिश्शैवः लोके वैष्णवः ॥

अप्राकट्येपि कर्तव्यतामेव विवृणोति शक्तेरुपास्तिरन्तःकरणैकवेद्या कार्या ॥

कुचन्दनेन शाक्तानां भ्रूमध्ये बिन्दुरिष्यते ॥
इति चिह्नानि विदितान्यपि विभूतिधारणादिशैवचिह्नैराच्छादितानि एव कार्याणि ॥ शिवस्यापि शक्त्यभेदात् ॥ "मामेव पौरुषं रूपं गोपिकानयनामृतं" इत्यादि वचनैर्विष्णुस्वरूपस्य परशिवावरोधत्रिपुरसुन्दरीप्रकटरूपान्तरात्मकतया सभासु विष्णुनामाम्रेडनादिना विष्णूपास्तिमेव प्रकटयेत् इति सूत्रत्रयार्थः ॥ अतएव विष्णुशिवशक्तीनामुत्तरोत्तरफलाधिक्यं उत्तरोत्तररहस्याभिप्रायेणोक्तं रहस्यनामसाहस्रे ॥

अयमेवाचारः ॥

सन्त्यन्येपि कौलिकानामाचारास्तन्त्रेषु विहिताः तेषां सर्वेषां मध्ये प्राकट्याभावरूपाचारः एवातीवमुख्य इत्यर्थः ।

आत्मज्ञानान्मोक्षः

कर्मवदतीवाचारएवासक्तस्सन्नात्मानुसन्धाने न प्रमाद्येत अपितूभयमपि सम्यगनुतिष्ठेदिति द्योतनायेह पुनः स्मारणम् ॥

लोकान्ननिन्द्यात्

प्रवाहणादिरूपाणि नानाविधानि दर्शनानि सर्वाण्येव तत्तदधिकारिभेदेन प्रमाणान्येव तानि सर्वथा न निन्देत् । तन्निन्दनेन तदधिकारिणां संशयोत्पत्त्या स्वावलम्बितदर्शनेप्यविश्वासः कौलिकेप्यनधिकारादुभयभ्रष्टतापत्त्याछिन्नाभ्रवन्नाशापत्तेः तेनोपासकस्य निन्दनीयत्वापत्तेर्वैगुण्यं ॥ अतएव "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां ॥" इति भगवान् कृष्णः । सर्वदर्शनानिन्दनमिति भार्गवरामश्च ।

इत्यध्यात्मं ॥

सर्वदर्शनानिन्दनं क्वोपयुज्यते इत्याशङ्कायामाह परेषां छिन्नाभ्रवन्नाशापेक्षया स्वस्य सर्वात्मभावे न्यूनतापत्तेरयमाचारोप्यात्मज्ञान एवोपकुरुत इत्यर्थः ॥

व्रतं न चरेत् ॥

पुरुषार्थरूपाणि व्रतानि नाचरेत् तैः प्राप्यस्यार्थस्येतोप्यधिकस्याभावात् ॥ यानि वर्णाश्रमधर्मरूपाणि पुरुषार्थसाधकत्वेन प्राप्तानि । प्राप्तानां नित्यनैमित्तिकानामङ्गत्वेन प्राप्तानि दर्शपूर्णमासाद्यंगभूतानि क्रत्वर्थव्रतानि तानि तु कार्याण्येव ॥ नित्यनैमित्तिकानां त्यागाविधानात्

न तिष्ठेन्नियमेन ॥

तस्यैवेदं विवरणं । नियमनस्य निर्बन्धरूपत्वेनात्मानुसन्धानविरोधित्वात् ॥

नियमान्न मोक्षः ॥

आत्मानुसन्धानाभावादेव मोक्षे विळम्बितत्वापत्तेरित्यर्थः ॥

कौलप्रतिष्ठां न कुर्यात् ॥

यदि कश्चिन्न्यायोपन्यासनिपुणः कौलं सन्न्यायैरवस्थापयितुं क्षमेत । सोपि नेमं मार्गं प्रतिष्ठापयेत् प्राकट्यभंगापत्तेः अतएवैतच्छास्त्रविषये ग्रन्थकारस्यापि कौलप्रतिष्ठारूपत्वेन तत्रापि निषेधप्रवृत्त्या साम्प्रदायिकानां कतिपयांशानां अप्रकटनाय गुरुमुखादेव ज्ञेयमिति तत्र तत्र लेखः संगच्छते ॥

सर्वसमो भवेत् ॥

एतच्छास्त्रेष्वेवाचारान्निष्कृष्य विधत्ते प्राणिमात्रे स्थावरमात्रे वा समो भवेत् ॥ अनन्यभावेन वर्तेत अतएव भागवते खं वायुमग्निं सलिलं महीञ्चेत्यादि

समुक्तो भवति

स एव सद्यो मुच्यते तादृशपुरुषधौरेयात् ईषन्न्यूनास्तु शनैश्शनैर्मुच्यन्त एवेति भावः ॥

पठेदेतानि सूत्राणि प्रातरुत्थाय देशिकः ।
आज्ञासिद्धिर्भवेत्तस्य इत्याज्ञा पारमेश्वरी ॥

अर्थानुसन्धानपूर्वकमेतानि सूत्राणि यः पठति स एव देशिकः तस्यैवाज्ञासिद्धिः अप्रतिहताज्ञता शिवभाव इति यावत् । एवं परमेश्वर स्याज्ञा अतोऽनाश्वासो न कार्य इति भावः ॥

यश्चाचारविहीनोपि योवा पूजां न कुर्वते ।
यदि ज्येष्ठं न मन्येत नन्दते नन्दने वने ॥

यः पूर्वोक्ताचारान्नानुतिष्ठति संशयापन्नमनास्तु तदुक्तविधां सपर्यां न करोति वचनव्यत्ययश्छान्दसः ॥ अयं पन्थास्सर्वोत्तम इति न मन्यते ॥ एतादृशोप्युपासकाभासः उक्तफलालाभेपि स्वर्गमात्रं लभत एव । किमु यथावत्तदुपासकस्य यथोक्तफलप्राप्तिरिति भावः ॥ इति कौलमार्गपारावारपारीण श्रीमद्भास्कररायविरचितं कौलोपनिषद्भाष्यं संपूर्णम् ॥

इति ॥ श्रीरस्तु ॥

॥ ॐ ॥

श्री त्रिपुरास्तवराजः

श्री शिवाचार्यवर्याद्यां शङ्कराचार्य मध्यमां
अस्मदाचार्यपर्यन्तां वन्दे गुरु परम्परां ॥

श्रीनाथादि गुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीत्रयं मण्डलं ॥

वीराद्यष्ट चतुष्क षष्टिनवकं वीरावळी पञ्चकं
श्रीमन्मालिनि मन्त्रराज सहितं वन्दे गुरोर्मण्डलं ॥

वन्दे गुरुपदद्वन्द्व मवाङ् मनसगोचरं
रक्त शुक्ल प्रभामिश्रमतर्क्यं त्रैपुरं महः ॥

सेवे सिंदूरसन्दोह सुन्दर स्वांग भासुरां
करुणापूर पीयूष कटाक्षां कुलनायिकां ॥ १ ॥

द्विनेत्रं द्विभुजं शान्तं गुरुं पद्मासनस्थितं
योगपीठे समासीनं नमामि शिरसिस्थितम् ॥ २ ॥

नमामि सद्गुरुं शांतं प्रत्यक्ष शिवरूपिणम्
शिरसा योगपीठस्थं मुक्तिकामार्थ सिद्धये ॥ ३ ॥

यानित्या परमा शक्तिर्जगच्चैतन्यरूपिणी
तां नमामि महादेवीं पञ्चमीं मातृरूपिणीं ॥ ४ ॥

यस्या स्सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति
लयमेष्यति यस्यां तां पञ्चमीं प्रणमाम्यहं ॥ ५ ॥
श्रीमत् कल्पतरोर्मूले भवान्या रत्न मंदिरे
रत्नसिंहासने देव्याः श्रीचक्रं प्रणमाम्यहम् ॥ ६ ॥
भूगृहं गुणरेखाढ्यं वेदद्वारोपशोभितम्
त्रिवृत्तं षोडशदळं तथाष्ट दळ कर्णिकम् ॥ ७ ॥
मनुकोणं द्विदिक्कोणं वसुकोणं त्रिकोणकम्
मध्येबिंदुमहाचक्रं नित्यं श्री त्रिपुरामयं ॥ ८ ॥
ब्रह्माण्डाधारशक्तीश्च कलाः स्मरपुरंदराः
एतास्संयोज्य पुरतईश्वरीं योजयेत्शिवे ॥ ९ ॥
चद्रबीजं बिंदुसंस्थं शिवबीजं नियोजयेत्
मादनं शक्रबीजस्थं योजयेत् भुवनेश्वरीं ॥ १० ॥
शिवबीजं मादनस्थं शक्रषष्ठी समन्वितम्
सप्तमंतच्चशक्रस्थं मायाबीजं समुद्धरेत् ॥ ११ ॥
तुंगाक्षरं शिवादिस्थं मरुदिन्द्रसम न्वितम् ॥
धराधर सुताबीजमेकत्रापि नियोजयेत् ॥ १२ ॥
बगळा तुरीयबीजाधः षोडशंचनियोजयेत्
वाक्स्थं तुरीयकं बीजं शाक्रबीजं नियोजयेत् ॥ १३ ॥
पिनाकेशं चन्द्रसंस्थमाकाशं रससंस्थितम्
चतुर्थ स्वरसंयुक्तं नादबिन्दु समन्वितम् ॥ १४ ॥

सर्वमेकत्र संयोज्य पञ्चपञ्चाक्षरी भवेत्
पञ्चकूटात्मिकाविद्या सर्वतन्त्रेषुगोपिता ॥ १५ ॥
विद्या चूडामणिर्देवी प्रोक्तासर्वोत्तमोत्तमा
तत्र स्नेहान्मयाख्याता नाख्येया यस्यकस्यचित् ॥ १६ ॥
इन्द्रोमां रक्षयेत्प्राच्यामाग्नेय्यामग्निदेवता
याम्ये यमस्सदा पातु नैर्ऋते निर्ऋतिश्चमां ॥ १७ ॥
पश्चिमे वरुणः पातु वायव्ये वायुदेवता
धनदश्चोत्तरे पातु ऐशान्यामीश्वरोवतु ॥ १८ ॥
ऊर्ध्वे प्रजापतिः पाया दधश्चानन्त देवता
एवं दशदिशो रक्षां कुर्वन्त्वाशाधि देवताः ॥ १९ ॥
गणेशस्सर्वदा पातु क्षेत्रेशो रक्षयेत्सदा
द्वारश्रीस्सर्वदा पातु देहळी पातु सर्वदा ॥ २० ॥
गणनाथस्सदा पातु दुर्गामां परिरक्षतु
वटुको भैरवश्चान्ते क्षेत्रपालोभिरक्षतु ॥ २१ ॥
सहरत्या स्वपत्न्याच कामदेवश्च सर्वदा
प्रीत्या सहवसन्तोपि पातुमां नन्दने वने ॥ २२ ॥
चक्रस्य पश्चिमे भागे भवान्यारत्नमन्दिरे
शंखपद्मनिधीरक्षां कुरुतां कामसिद्धये ॥ २३ ॥
पातुमां रत्नसोपानं परमैश्वर्य शोभितम्
रक्षयेत्पश्चिमे द्वारे भवान्या रत्नमन्दिरे ॥ २४ ॥

सरस्वती महालक्ष्मीर्माया दुर्गा विभूतये
भद्रकाळी तथा स्वस्ति स्वाहा चैवशुभङ्करी ॥ २५ ॥
गौरी च लोकधात्री च वागीश्वर्यादयो मम
एताश्चात्रस्थितास्सर्वा रक्षां कुर्वन्तु सर्वदा ॥ २६ ॥
पाषण्डाचारिणो भूता भूमौ येचान्तरिक्षगाः
दिविलोके स्थिता ये च ते गच्छन्तु शिवाज्ञया ॥ २७ ॥
वास्तूनामधिपोब्रह्मा स्रष्टा रक्षतु सर्वदा
कुलनाथस्सदा पातु द्वीपनाथोपि सर्वदा ॥ २८ ॥
शिवं कुर्वन्तु तास्सर्वा आसने पञ्च देवताः
पृथ्वित्वया धृता लोका देवित्वं विष्णुनाधृता ॥ २९ ॥
त्वञ्च धारय मां देवि पवित्रं कुरुचासनम्
चक्रस्य दक्षिणे भागे श्रीमत्पात्रस्य मण्डले ॥ ३० ॥
पञ्चरत्नानि मां पान्तु पूजकानाञ्च सिद्धये
तत्र पात्रासने पुण्ये सर्वदा वह्नि मण्डले ॥ ३१ ॥
वह्नेश्च मण्डलं पातु कुलदेव्याश्च पूजतु
धूम्रार्चि रूष्मा ज्वलिनी ज्वालिनी विष्फुलिंगिनी ॥ ३२ ॥
सुश्री स्सुरूपा कपिला हव्यकव्यवहे दश
वह्नेर्दशकलाज्ञेया स्सर्व धर्म फलप्रदाः ॥ ३३ ॥
एताभि स्सहितो रक्षां कुर्या द्वैश्वानरो मम
तत्रपात्रवरे दिव्ये श्रीमदादित्य मण्डले ॥ ३४ ॥

सूर्यस्य मण्डलं पातु मम सर्वार्थ सिद्धये
तपिनी तापिनी धूम्रा मरीचि ज्वालिनी रुचिः ॥ ३५ ॥
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा
क भाद्यर्णयुता भानोः ठडान्ता द्वादशेरिताः ॥ ३६ ॥
एताः कलास्तु सूर्यस्य सूर्य मण्डल संस्थिताः
एताभि स्सहितो रक्षामादित्यः प्रकरोतुमे ॥ ३७ ॥
तत्रपात्रामृते दिव्ये सोमस्यामृत मण्डले
अमृतं सर्वदा पातु भैरवानन्दहेतुकं ॥ ३८ ॥
अमृता मानदा पूषा तुष्टिः पुष्टीरतिर्धृतिः
शशिनी चन्द्रिका कान्तिज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥ ३९ ॥
पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः
सोममण्डल मध्यस्था रक्षां कुर्वन्तु सर्वदा ॥ ४० ॥
रवि वेदकलापूर्णे सुधा सम्पूर्ण मण्डले
नक्षत्राधिपती रक्षां करोतु मम सिद्धये ॥ ४१ ॥
सूर्याग्निमण्डले दिव्ये सम्पूर्णे शशिमण्डले
पातुमां खेचरीबीजा देषैकादशिनीशक्तत् ॥ ४२ ॥
शक्तियुक्ते सुरानन्दे भैरवाद्यैस्सशक्तिभिः
आनन्द भैरवो रक्षां करोतु मम सर्वदा ॥ ४३ ॥
तत्र पूर्णामृते पुण्ये शक्तिर्या वारुणीकला
आनन्दरूपिणी रक्षां करोतु मम सर्वदा ॥ ४४ ॥

सृष्टिर्बुद्धिर्मतिर्मेधा कान्तिर्लक्ष्मीः द्युतिःस्थिरा
स्थितिस्सिद्धिरितिख्याताः कचवर्ग कलादश ॥ ४५ ॥
अकाराद् ब्रह्मणोत्पन्नाः सृष्टिकर्मणि तत्पराः
एताभिस्सहितः पायात् ब्रह्मामां वाक्प्रदस्सदा ॥ ४६ ॥
जराचपालिनी शान्तिरीश्वरी रतिकामिके
वरदाह्लादिनी प्रीति र्दीर्घा चटतवर्गगाः ॥ ४७ ॥
उकाराद्विष्णु संभूताः स्थितिकर्मणि तत्पराः
एताभिस्सहितः पायान्मां विष्णुः पुष्टिदायकः ॥ ४८ ॥
तीक्ष्णा रौद्री भया निद्रा तन्द्रीक्षुत्क्रोधिनी क्रिया
उद्गारा मृत्युरूपाच पयवर्ग कलादश ॥ ४९ ॥
मकाराद्रुद्र संभूता स्संहार निरतास्सदा
एताभिस्सहितो रुद्रोमां पायान्मृत्यु नाशकः ॥ ५० ॥
तिरस्करिण्यः पशुहृत्पञ्चेंद्रिय विमोहनाः
अनन्तान्तास्तुताः पञ्च पीताश्वेतारुणा सिता ॥ ५१ ॥
बिन्दोरीश्वर संभूताः षळवर्ग कलास्तथा
तिरोधानपराभिर्मां पाया देताभिरीश्वरः ॥ ५२ ॥
निवृत्तिश्च प्रतिष्ठाच विद्याशान्ति स्तथैवच
इन्धिका दीपिकाचेति रेचिकामोचिका परा ॥ ५३ ॥
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता आप्यायिनी तथा
व्यापिनी व्योमरूपाच अनन्ताचेति षोडश ॥ ५४ ॥

एताः स्वरकला नादात्सदाशिवसमुद्भवाः
अनुग्रह प्रदानित्यं सर्वसिद्धि प्रदायकाः ॥ ५५ ॥
एताभिस्सहितः पायात्सदा पूर्वः शिवस्तुमां
मातृका पातुमां नित्यं सर्व मन्त्रस्वरूपिणी ॥ ५६ ॥
अखण्डैकरसानन्दकरी मां पातु सर्वदा
अमृतेशीसदा पातु दीपिनी पातु सर्वदा ॥ ५७ ॥
मूलविद्याच मां पातु श्रीमत्रिपुरसुन्दरी
कामेश्वर्यादिभिर्युक्ता नित्याभिः पातु मां सदा ॥ ५८ ॥
सर्वाधो मण्डुकाकारे रुद्रः कालानलो विभुः
रक्षां करोतु मे नित्यं यामूलप्रकृतिस्सदा ॥ ५९ ॥
ततश्चाधारशक्तिर्या मम रक्षां करोतु सा
कूर्मस्तु सततं पाया दनन्तो रक्षयेत्सदा ॥ ६० ॥
तस्य मूर्ध्निस्थितः श्वेतवराहः परिरक्षतु
दन्ते तस्य स्थिता पृथ्वी पातु नित्यं वसुन्धरा ॥ ६१ ॥
समुद्र स्सर्वदा पातु सुरत्नैरमृतैर्जलैः
रत्नद्वीपश्च मे रक्षां करोतु स्वर्णपर्वतः ॥ ६२ ॥
पातुमां नन्दनोद्यानं पान्तुमां कल्पभूरुहः
अधस्तेषां सदा पातु विचित्रा रत्नभूमिका ॥ ६३ ॥
वालुकाः पञ्चमां पान्तु पान्तु देवमहीरुहः
नवरत्नमयास्तत्र प्राकाराः पान्तुमां नव ॥ ६४ ॥

श्रीरत्नमन्दिरं दिव्यं चिन्तामणि विभूषितम्
तत्र पद्मे महा दिव्ये प्रभामण्डल वेदिका ॥ ६५ ॥
श्वेतच्छत्रं सदा पातु रत्नमुक्तामणि प्रभं
प्रभामध्यस्थितं पातु रत्नसिंहासनश्चमां ॥ ६६ ॥
सिंहासनस्य पार्श्वस्थं धर्मं ज्ञानं च रक्षतु
वैराग्यं रक्षयेन्नित्यं ऐश्वर्यं रक्षयेत्सदा ॥ ६७ ॥
अधर्मोरक्षयेन्नित्यमज्ञानं परिरक्षतु
अवैराग्यन्तुमां पायादनैश्वर्यन्तु सर्वदा ॥ ६८ ॥
सिंहासनस्य मध्यस्था दुर्गामां परिरक्षतु
मायामां पातु तत्रैव विद्यामां परिरक्षतु ॥ ६९ ॥
श्रीविद्या शुद्धविद्या च मातंगी भुवनेश्वरी
वाराही च समाख्याताः पञ्चविद्याश्च पान्तुमां ॥ ७० ॥
अनन्तो रक्षयेन्नित्यं फणपञ्चदशान्वितः
तन्मध्य फणमध्यस्थं महापद्मं च रक्षतु ॥ ७१ ॥
पातुचानन्दकन्द्वं मां ज्ञाननाळं च रक्षतु
दळा प्रकृतिरूपं मां प्रकृत्याकार केसरैः ॥ ७२ ॥
पातुमां पातुनित्यं सा तत्वरूपाच कर्णिका
सूर्यस्यमण्डलं पातु पातुमां सोममण्डलं ॥ ७३ ॥
वह्नेश्चमण्डलं पातु सत्वं रक्षतु सर्वदा
रजश्च पातुमां नित्यं पातु नित्यं तमोगुणः ॥ ७४ ॥

आत्माचैवान्तरात्मा च परमात्मा च रक्षतु
ज्ञानात्मा च तथा रक्षां करोतु मम सर्वदा ॥ ७५ ॥
आत्मतत्वं शक्तितत्वं विद्यातत्वं तथैवच
सदाशिवस्य यत्तत्वं तत्सर्वं पातुमां सदा ॥ ७६ ॥
ज्ञानं माया कला विद्या तत्वात्मानो विभूतयः
रत्नसिंहासने देव्या रक्षां कुर्वन्तु सर्वदा ॥ ७७ ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः
एते पञ्च महाप्रेता रक्षां कुर्वन्तु सर्वदा ॥ ७८ ॥
सुधार्णवासनं पातु पातु पोतांबुजासनं
देव्यासनं सदा पातु पातु चक्रासनश्चमां ॥ ७९ ॥
सर्व मन्त्रासनं पातु साध्य सिद्धासनं तथा
सर्व योन्यासनं पातु सर्वदा मम रक्षणं ॥ ८० ॥
करोतु कुलसुन्दर्याः कामरूपं शिवासनं
तत्रैवसंस्थिता देव्यो रक्षां कुर्वन्तु सर्वदा ॥ ८१ ॥
त्रिपुरा त्रिपुरेशोच त्रिपुराद्याच सुन्दरी
त्रिपुरा वासिनी पश्चात् त्रिपुरा श्रीश्चमालिनी ॥ ८२ ॥
सिद्धाम्बा भैरवीत्येताः त्रिपुराद्याश्च पान्तुमां
गुरवो दिव्य सिद्धौघ मानवौघा स्त्रिधास्थिताः ॥ ८३ ॥
मुनि वेदा नाग संख्या रक्षां कुर्वन्तु सर्वदा
समस्त प्रकटा गुप्ता स्तथा गुप्ततरांश्चयाः ॥ ८४ ॥

संप्रदायाः कुलोत्तीर्णा निगर्भाश्च रहस्यकाः
तथैवातिरहस्याश्च परापर रहस्यकाः ॥ ८५ ॥
नवधा पूजनं तत्र योगिनीनां विधीयते
एतास्तु सततं रक्षां कुर्वतां योगिनीगणाः ॥ ८६ ॥
त्रैलोक्य मोहनं चक्रं प्रथमं परिरक्षतु
अणिमा पश्चिमे पातु लघिमा चोत्तरे तथा ॥ ८७ ॥
पूर्वद्वारे चमहिमा ईशिता पातु दक्षिणे
वशिता मारुते पातु प्राकाम्या त्वोशके तथा ॥ ८८ ॥
भुक्तिसिद्धि स्तथाग्नेय्या मिच्छा रक्षतुर्नैर्ऋते
अधः पातु सदा प्राप्तिः सर्व कामप्रदायिनी ॥ ८९ ॥
सर्वकामा सदा पातु ऊर्ध्वें चोर्ध्वनिवासिनी
एताः प्रथम रेखायां सर्वाः प्रकटपूरिताः ॥ ९० ॥
भैरवश्चाऽसितांगोयः कामरूपस्य पीठके
ब्रह्माणी सहितः पूर्वे द्वारे मां परिरक्षतु ॥ ९१ ॥
मलये चाग्निदिग्भागे संस्थितो रुरु भैरवः
माहेशी सहितः पातु कुलाचारस्य सिद्धये ॥ ९२ ॥
चण्डः कोलगिरौ रक्षां कौमारी सहितो यमे
करोतु भैरवो नित्यं पूजकानाञ्च सिद्धये ॥ ९३ ॥
वैष्णवी सहितः क्रोधः कुलान्ते पोठराजके
नैर्ऋते सर्वदा पातु भोग मोक्षार्थ सिद्धये ॥ ९४ ॥

चौहार्ये पश्चिमे पीठे वाराही सहित स्सदा
उन्मत्त भैरवो रक्षां करोतु मम सिद्धये ॥ ९५ ॥
जालन्धरे महापीठे कपाली भैरव स्सदा
इन्द्राणी सहितो रक्षां वायव्ये प्रकरोतु मे ॥ ९६ ॥
ओड्याणे चोत्तरे पीठे चामुण्डा सहित स्सदा
भीषणो भैरवः पातु साधकानाञ्च सिद्धये ॥ ९७ ॥
संहारश्चण्डिकायुक्तो देवीकोट्टेच पीठके
ऐशान्यां रक्षयेन्नित्यं कुलाचारस्य सिद्धये ॥ ९८ ॥
एते द्वितीय रेखायां संस्थिताश्चतुरश्रगाः
सर्व संक्षोभिणी मुद्रा पश्चिमे पातु सर्वदा ॥ ९९ ॥
द्राविणीचोत्तरे पातु पूर्वे चाकर्षिणी सदा
याम्ये वश्या सदा पातु उन्मादा मारुते सदा ॥ १०० ॥
ईशे महाङ्कुशा पातु त्रिखण्डा पातु चानले
नैर्ऋते बीजमुद्रा च ऊर्ध्वे रक्षतु खेचरी ॥ १०१ ॥
महामुद्रा त्वधः पातु योगिनी योनिरूपिणी
सुसिद्धयो मुद्रिकाश्च भैरवा स्सह मातृभिः ॥ १०२ ॥
एताश्चक्र स्थिता नित्यं सर्व कामफल प्रदाः
चतुरश्रेत्रिरेखायां रक्षां कुर्वन्तु ते सदा ॥ १०३ ॥
सर्वाशापूरकं चक्रं द्वितीयं परिरक्षतु
कामाकर्षण रूपाच बुध्याकर्षण रूपिणी ॥ १०४ ॥

अहङ्काराकर्षिणीच शब्दाकर्षण रूपिणी
स्पर्शाकर्षण रूपाच रूपाकर्षण रूपिणी ॥ १०५ ॥
रसाकर्षण रूपाच गन्धाकर्षण रूपिणी
चित्ताकर्षण रूपाच धैर्याकर्षण रूपिणी ॥ १०६ ॥
स्मृत्याकर्षण रूपाच नामाकर्षण रूपिणी
बीजाकर्षण रूपाच आत्माकर्षण रूपिणी ॥ १०७ ॥
अमृताकर्षिणी देवी शरीराकर्षिणी तथा
एताश्चक्र स्थिता नित्यं स्वराणां षोडशे दळे ॥ १०८ ॥
सर्वाभीष्ट प्रदा देव्यो रक्षां कुर्वन्तु सर्वदा
सर्व संक्षोभणं चक्रं तृतीयं परिरक्षतु ॥ १०९ ॥
अनंगकुसुमा पूर्वे दक्षिणे नंगमेखला
पश्चिमे नंगमदना उत्तरे मदनातुरा ॥ ११० ॥
अनंगरेखाचाग्नेय्यां नैर्ऋतेऽनंगवेगिनी
वातेऽनंगाङ्कुशाचैव ईशोचानंगमालिनी ॥ १११ ॥
कवर्गाद्यष्ट वर्गस्था अष्टौचाऽनंगशक्तयः
रक्षां कुर्वन्तु तास्सर्वा देव्यश्चाष्टदळे स्थिताः ॥ ११२ ॥
सर्व सौभाग्यदं चक्रं चतुर्थं परिरक्षतु
सर्व संक्षोभिणी शक्ति स्सर्व विद्राविणी तथा ॥ ११३ ॥
सर्वाकर्षण शक्तिश्च सर्वाह्लाद स्वरूपिणी
सर्व संमोहिनी शक्तिः सर्व स्तम्भन रूपिणी ॥ ११४ ॥

सर्व जृम्भण शक्तिश्च सर्वतो वश्य रूपिणी
सर्व रञ्जन शक्तिश्च सर्वोन्माद स्वरूपिणी ॥ ११५ ॥
सर्वार्थ साधनो शक्ति स्सर्व सम्पत्तिपूरणी
सर्व मन्त्रमयी शक्ति स्सर्व द्वन्द्वक्षयंकरी ॥ ११६ ॥
चतुर्दशारचक्रस्था रक्षां कुर्वन्तु सर्वदा
सर्वार्थ साधकं चक्रं पञ्चमं परिरक्षतु ॥ ११७ ॥
सर्व सिद्धिप्रदा देवी सर्व सम्पत्प्रदायिनी
सर्व प्रियङ्करी शक्ति स्सर्व मंगळकारिणी ॥ ११८ ॥
सर्व कामप्रदादेवी सर्व दुःखविमोचनी
सर्व मृत्युप्रशमनी सर्व विघ्नविनाशिनी ॥ ११९ ॥
सर्वांग सुन्दरो देवी सर्व सौभाग्यदायिनी
बहिर्दशार चक्रस्था रक्षां कुर्वन्तु सर्वदा ॥ १२० ॥
सर्व रक्षाकरं चक्रं षष्ठं रक्षतु सर्वदा
सर्वज्ञा सर्व शक्तिश्च सर्वैश्वर्य प्रदायिनी ॥ १२१ ॥
सर्व ज्ञानमयीदेवी सर्व व्याधिविनाशिनी
सर्वाधार स्वरूपाच सर्व पापहरा तथा ॥ १२२ ॥
सर्वानन्दमयी देवी सर्व रक्षा स्वरूपिणी
तथैवहिमहादेवी सर्वेप्सित फलप्रदा ॥ १२३ ॥
अन्तर्दशार चक्रस्था रक्षां कुर्वन्तु सर्वदा
सर्व रोगहरं चक्रं सप्तमं परिरक्षतु ॥ १२४ ॥

वाग्देवीवशिनी पातु पातु कामेश्वरीचमां
मोदिनी विमला पातु अरुणाजयिनीचमां ॥ १२५ ॥
सर्वेश्वरीचमे रक्षां कुरुतां कौलिनी तथा
वाग्देव्यो वरदास्सन्तु सर्वा स्तुष्यन्तु पूजिताः ॥ १२६ ॥
अष्टकोणान्तरे वाण्यो रक्षां कुर्वन्तु सर्वदा
सर्व सिद्धिप्रदं चक्रमष्टमं परिरक्षतु ॥ १२७ ॥
अष्टकोणान्तर स्थाने त्रिकोणे बहिरायुधः
श्रीमत्पाशाङ्कुशधनुर्बाणाश्चायुध देवताः ॥ १२८ ॥
षडङ्गदेवताः पान्तु अंगस्थाश्चांग देवताः
महादेव्याश्चक्र संस्था रक्षां कुर्वन्तु सर्वदा ॥ १२९ ॥
श्रीमत् त्रिकोण मध्येतु तत्र कोणत्रयेषुच
मध्येच सर्वदा पान्तु चतस्रः पीठदेवताः ॥ १३० ॥
कामे कामेश्वरी पातु पूर्णे वज्रेश्वरी तथा
जालन्धरे महापीठे पातुमां भगमालिनी ॥ १३१ ॥
ओड्याणके महापीठे महात्रिपुरसुन्दरो
सर्वानन्दमयं चक्रं नवमं परिरक्षतु ॥ १३२ ॥
सूर्येन्दुवह्निपीठेतु बिन्दुचक्र निवासिनी
ब्रह्मस्वरूपिणी पातु श्रीमत् त्रिपुरसुन्दरी ॥ १३३ ॥
योनिमध्येतु परितः नित्याः षोडश शक्तयः
देव्यः श्रीचक्रमध्यस्थाः रक्षां कुर्वन्तु सर्वदा ॥ १३४ ॥

त्रैलोक्य मोहने चक्रे चतुरश्रे सुशोभने
पातुमामनिशंदेवी त्रिपुरा परमेश्वरी ॥ १३५ ॥
सर्वाशापूरके चक्रे षोडशारे मनोहरे
तत्र चक्रेश्वरी नित्यं पातुमां त्रिपुरेश्वरी ॥ १३६ ॥
तथाष्टदळ चक्रेतु सर्व संक्षोभकारके
तत्र चक्रेश्वरी नित्यं पायात् त्रिपुरसुन्दरी ॥ १३७ ॥
चतुर्दशार चक्रेतु शुभे सौभाग्यदायके
तत्र चक्रेश्वरी नित्यं पायात् त्रिपुरवासिनो ॥ १३८ ॥
सर्वार्थ साधके बाह्येदशारे चक्रराजके
त्रिपुराश्रीस्सदा पातु मम कल्याणहेतवे ॥ १३९ ॥
अन्तर्दशार चक्रेतु सर्व रक्षाकरेपरे
नित्यं चक्रेश्वरीदेवी पायात् त्रिपुरमालिनी ॥ १४० ॥
अथाष्टकोण चक्रेतु सर्व रोगहरेपरे
पातुमां त्रिपुरासिद्धादेवी चक्रेश्वरी सदा ॥ १४१ ॥
सर्वसिद्धिप्रदे चक्रे गुणकोणे मनोहरे
चक्रेश्वरीचमे रक्षां करोतु त्रिपुरांबिका ॥ १४२ ॥
सर्वानन्दमये चक्रे मध्ये बिन्दौ सुशोभने
महाचक्रेश्वरी पातु श्रीमत्त्रिपुर भैरवी ॥ १४३ ॥
नित्याकामेश्वरी पातु पातुमां भगमालिनी
नित्यक्लिन्नाचमां पातु भेरुण्डा पातु सर्वदा ॥ १४४ ॥

मां वह्निवासिनी पातु महावज्रेश्वरी तथा
पातुमां शिवदूतीच त्वरिता रक्षयेत्सदा ॥ १४५ ॥
कुलसुन्दरी मां पातु नित्या नित्याच पातुमां
नित्या नीलपताकाच विजया पातु सर्वदा ॥ १४६ ॥
श्री सर्वमंगळा पातु नित्या ज्वालांशु मालिनी
नित्या नीलपताक्काचविजया पातुसर्वदा ॥ १४७ ॥
श्रीसर्व मंगळा पातु नित्या ज्वालां शुमालिनी
विचित्रासर्वदापातु षोडशीपातु सुन्दरी ॥ १४८ ॥
षोडशीप्रथमानित्या त्रिपश्च तिथिगामिनी
अनुलोमविलोमेन श्रीमत्रिपुर सुन्दरी ॥ १४९ ॥
महाविद्या तुरीयातु पातुमां बहुरूपिणी
महासप्तदशीनित्या नित्यमानन्दरूपिणी ॥ १५० ॥
पूर्वदक्षिणपश्चाच्च उत्तरोर्ध्वमनुत्तरम्
बौद्धवैदिकशैवाश्च सौरवैष्णवशाक्तकाः ॥ १५१ ॥
सृष्टिस्थितिलयाख्यानां वासोरक्षतु सर्वदा
चत स्रस्समयादेव्यो योगिन्यः पान्तु सर्वदा ॥ १५२ ॥
चतुरश्रेमहाचक्रे तारामां परिरक्षतु
डाकिनी शाकिनीपातु लाकिनीकाकिनीतथा ॥ १५३ ॥
साकिनीहाकिनीपातु याकिनी सर्वरूपिणी
वर्णस्थमातृकास्सर्वादेहस्थमातृकाश्रयाः ॥ १५४ ॥

रक्षां कुर्वन्तु तास्सर्वाश्चक्रराजेतु पूजिताः
श्रीचक्रे पूजितायाया याः पूजितायाया नपूजिताः ॥ १५५ ॥
सर्वास्ताः पूजितास्सन्तु श्रीमत् त्रिपुरसुन्दरी
चतुरश्रे महाचक्रे बुद्धोमां परिरक्षतु ॥ १५६ ॥
पातुमामनिशं देवः षोडशारे प्रजापतिः
तथाष्टदळ चक्रेतु शिवो मां परिरक्षतु ॥ १५७ ॥
चतुर्दशार चक्रेतु भास्करो रक्षयेत्सदा
द्विदशारे तथा पातु प्रभुर्नारायणो हरिः ॥ १५८ ॥
अष्टारेमध्य चक्रेतु पातु मां भुवनेश्वरी
अष्टारान्तस्त्रिकोणेतु कालिका पातु सर्वदा ॥ १५९ ॥
त्रिकोणान्तर चक्रेतु पातु कात्यायनीच मां
नवचक्रेश्वरी नित्या या नित्या परमाकला ॥ १६० ॥
पातुमामनिशं देवी श्रीमत्रिपुरसुन्दरी
महात्रिपुरसुन्दर्याश्चिन्तनीयाच या परा ॥ १६१ ॥
ब्रह्मस्वरूपिणी पातु पञ्चमी परदेवता
पञ्चमी पातु सततं नित्यं रक्षतु पञ्चमी ॥ १६२ ॥
शान्ति करोतु सा नित्या पञ्चमी परदेवता
सापुनः पञ्चमी शक्तिः नित्य चैतन्यरूपिणी ॥ १६३ ॥
कारणानन्द मध्यस्था पातुमां पञ्चमी तथा
पञ्चतत्वं तथा पञ्चयत्किंचित्पञ्चमं स्मृतं ॥ १६४ ॥
नित्यं पञ्चगुणैः पातु पञ्चमी परदेवता
पञ्चपञ्चाक्षरैर्मन्त्रैः पञ्चकूटैश्च पञ्चभिः ॥ १६५ ॥

पञ्चमी पातु सततं नित्यं रक्षतु पञ्चमी
श्रीविद्याच तथा लक्ष्मोर्महालक्ष्मी स्तथैवच ॥ १६६ ॥
त्रिशक्तिस्सर्व साम्राज्यलक्ष्मीः पञ्चकोर्तिताः
श्रीविद्याच परंज्योतिः परानिष्कळ शाम्भवी ॥ १६७ ॥
अजपा मातृकाचेति पञ्चकोशाः प्रकीर्तिताः
श्रीविद्यात्वरिताचैव पारिजातेश्वरी तथा ॥ १६८ ॥
टा त्रिपुरा पञ्चबाणेशी पञ्चकल्पलताःस्मृताः
श्रीविद्यामृतपोठेशी सुधासूरमृतेश्वरी ॥ १६९ ॥
अन्नपूर्णेतिविख्याताः पञ्चकामदुघाःस्मृताः
श्रीविद्या सिद्धलक्ष्मीश्च मातङ्गी भुवनेश्वरी ॥ १७० ॥
वाराही पञ्चरत्नानामीश्वर्यश्च प्रकीर्तिताः
गणेशो वटुकश्चैव क्षेत्रेशो योगिनीगणाः ॥ १७१ ॥
तर्पिते बलिपात्राणि सर्वे रक्षन्तु पूजिताः
ऐशान्यां सर्वदा पातु नित्यं निर्माल्यवासिनी ॥ १७२ ॥
शेषिकासुन्दरी पातु बिन्दुचक्र निवासिनी
नित्या कामकला पातु मुद्रा मां पातु खेचरी ॥ १७३ ॥
शक्तिर्मां सर्वदा पातु या मूलाधारवासिनी
मुद्रामन्त्रोपचारैस्तु समस्ता देवताश्चयाः ॥ १७४ ॥
श्रीश्चक्र पूजिताचास्तु श्रीमत् त्रिपुरसुन्दरी
श्रीमत् त्रिपुरसुन्दर्याःस्तवराजं मनोहरं ॥ १७५ ॥
पूजाक्रमेण कथितं साधकानां सुखावहं
क्रमेणानेन विधिना श्रीमत् त्रिपुरसुन्दरीं ॥ १७६ ॥

पूज्य साधकश्रेष्ठो रक्षामन्त्रं सदा पठेत्
प्रातःकाले शुचिर्भूत्वा निशाया मर्धरात्रके ॥ १७७ ॥
अथवा सङ्कटे प्राप्ते राजद्वारे सुदुर्गमे
जलेवाचानलेवापि श्मशाने दुर्गमेगिरौ ॥ १७८ ॥
यत्र यत्र भये प्राप्ते स तत्रैव पठेन्नरः
सर्वावयवभावेन देवीं सञ्चिन्त्य साधकः ॥ १७९ ॥
रक्षां कुर्वीत यत्नेन सर्वाऽशुभविनाशिनीं
स्तोत्रञ्चाद्भुतमेवेदं त्रैलोक्येचापि दुर्लभम् ॥ १८० ॥
गोपनीयं प्रयत्नेन यदीच्छेदात्मनोहितम्
यस्मै कस्मै नदातव्यं नवक्तव्यं कदाचन ॥ १८१ ॥
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत्
दुष्टेभ्यस्साधकेभ्योपि बान्धवेभ्यो नदर्शयेत् ॥ १८२ ॥
दत्तेच सिद्धिहानिःस्यादित्याज्ञाशांकरैःकृता
मन्त्राः पराङ्मुखायान्तिक्रुद्धा भवतिसुन्दरी ॥ १८३ ॥
अशुभंच भवेत्तस्य तस्माद्यत्नेन गोपयेत्
यद्गृहे विद्यते स्तोत्रंग्रन्थं लिखितमुत्तमं ॥ १८४ ॥
चञ्चलापिस्थिराभूत्वा कमला तत्र निष्ठति
तस्माद्यत्नादिमं ग्रन्थं पूजयेत् गन्धपुष्पकैः ॥ १८५ ॥
पूजाफलं लभेन्नित्यं सुन्दरी सन्निधौ जपेत्
स्तवराजमिमं पुण्यं यः पठेत्सुसमाहितः ॥ १८६ ॥
तत् फलं लभते तस्मात् शृणुध्वं साधकोत्तमाः
वारमेकन्तु योधीयात् स पूजाफलमश्नुते ॥ १८७ ॥

वेदिता मातृ चक्रस्य साधको भुविजायते
मासमेतत् क्रमेणैव पठेत् भक्तिपरायणः ॥ १८८ ॥
स्वर्गेपि विदितो भूत्वा देवी भक्तस्तु भूतले
भक्त्याच धारयेद्यस्तु लिखित्वा स्तोत्रमुत्तमम् ॥ १८९ ॥
शिखायामथवाकण्ठे बाहौवा भक्तिसंयुतः
सभवेत्साधकश्रेष्ठो मातॄणांच सदाप्रियः ॥ १९० ॥
लभते सर्व कामान्वै परं स्वस्त्ययनं भवेत्
तस्मादिदं प्रयत्नेन धारयेद्विधिना तथा ॥ १९१ ॥
पठित्वा पूजयित्वा च त्रैलोक्यं वशमानयेत्
भक्ताय ददते तस्मै मन्त्रं रक्षाकरं परं ॥ १९२ ॥
धृत्वासौवर्ण मध्यस्थं सर्व कामान्नरो लभेत्
यानिवाञ्छति कामानि भुक्तिमुक्ति कराणिच ॥ १९३ ॥
लभते नात्र सन्देहो भुवि स्वर्गे रसातले
दृष्ट्वाच साधकश्रेष्ठं ग्रहराक्षस हिंसकाः ॥ १९४ ॥
दूरादेवपलायन्ते नसमर्थाश्च हिंसितुं
विषंनिर्विषतां याति पापं निर्यातिसंक्षयं ॥ १९५ ॥
देववन्मानवो भूत्वा भुनक्ति बहुळं सुखम्
तस्मान्नित्यं पठेत् धीमान्मुक्ति कामार्थ सिद्धये ॥ १९६ ॥
भक्त्याच धारयेद्देवीं स्वरक्षां सर्वदाचरेत्
पूर्वजाति परिज्ञान वेद्यं जन्म सहस्रकं ॥ १९७ ॥
न पुनर्जायते योनौ मरणं नास्तिचाऽपरं
गन्धर्व रूपवान् भूत्वा संपूज्य परमेश्वरी ॥ १९८ ॥

क्षामन्त्रं पठित्वाच देवत्वं लभते ध्रुवं
पुत्रो लभते पुत्रं दरिद्रो लभते धनं || १९९ ||
यं वापि स्मरेन्नित्यं तंतमाप्नोति निश्चितं
ति दुःखालये कष्टे भीमेनिगळ बन्धने || २०० ||
कृत् पाठे कृते नित्यं निगळान्मुच्यते ध्रुवं
ष्कृतैरभिचारैश्च रोगैर्यक्ष्मादिभिश्चयः || २०१ ||
र प्रयुक्तैर्ग्रस्तोपि पठनान्मुच्यते नरः
मं त्रिपुरसुन्दर्याः स्तवराजं मनोहरं || २०२ ||
क्षामन्त्रश्चशुभदं शिवेन परि कीर्तितं
ः पठेत्प्रयतो भक्त्या सद्योरोगात्समुच्यते || २०३ ||
ायुरारोग्यमैश्वर्यं भुक्तिं मुक्तिंच विन्दति
र्वान् कामानवाप्नोति देवेन्द्रस्यापि दुर्लभान् || २०४ ||

|| इति श्रीत्रिपुरास्तवराजस्संपूर्णः ||